नं. — ४९६२

ग्र. नाम तारा सहस्रनाम
व्याख्या सिद्धार्थ
[illegible] मणिः

कर्ता श्री विश्वेश्वरः

पत्र सं. १२१ — सं. १९४१

विषय. तन्त्रम्.

© Dharmartha Trust J&K. Digitized by eGangotri

॥ तारासहस्राभिधानां व्याख्या गुह्यार्थदर्पणम् ॥
विश्वेश्वरमहापाध्यायरचिता रञ्जनी नृणाम्।

© Dharmartha Trust J&K. Digitized by eGangotri

गी॰
स॰टी॰
१

ॐ श्रीगणेशाय नमः ॐ इंदीवरच्छदकदंबकसुंदरांगं तं दारकेंद्रपरिवंदितया
दपद्मं आनंदतुंदिलममंदविदद्विनीयं देदीप्यतां हृदि सदा विशदं तदोजः १
नत्वा मननतावरणयुगलं भक्तिवाहुल्यपूर्वं स्वस्ति श्रीमद्गुर्जनशिरोरत्नलक्ष्मी
धरस्य नारायणनाम्नो द्वादशशतमिदं स्वीयबोधानुरूप्यात्तस्य व्याख्यायत इह तत्तद्गे
नविशेषस्वरेण २ तत्रायमाद्यो वस्तुनिर्देशप्रतिपादकः श्लोकः कैलासेति केल
योर्जलभूम्योरस्ति केलसनमस्येवा कैलासः स्फटिकं तस्यायं कैलास इति
स्वामी शिखरासीनमिति पाठे तत्रास्थितमित्यर्थः शिखरदेवमिति पाठे प्यार्थिकः
सएवार्थः महादेवशब्दः अपि विशेषावच्छिन्नं दैवतं ते योगरूढः तथा च स्कंदपु
राणे महतामपि देवानामहमेव महान्यतः तमेतोप्यधिकोस्म्यतो महादेवस्त
तो ह्यहं अत्र संदेयः स्पष्टतालोकः तत्रासीनमित्यनेन तत्स्वस्वरूपत्वात्पद्मासम
योजितः कालानुरोधः प्रतिभानवत्वमेते गुणाः कामदुघाः क्रियास्विरत्यु
क्तेः इहसीति गीयतमुक्ते तत्रापरेण महावस्थां तस्यानु वितनातं भवस्त्रीत १

© Dharmartha Trust J&K. Digitized by eGangotri

सेवंयार्थंभवानीत्युक्तं नापृष्टःकस्यचिद्ब्रूयान्नचान्यायेनपृच्छतइतिवचनात्
उत्तरदानार्थंश्रीत्येत्युक्तं परमेश्वरेतिसर्वज्ञत्वात्प्रष्टव्यार्थनिर्वचनसामर्थ्यंसू
चनं तथाचईश्वरपदे ज्ञानादिमत्परंपरमपदार्थनित्यसर्वविषयस्ततदेकदेशो
ज्ञानेऽभेदान्वयः महेश्वरपदे रूढिंविहाययोगार्थमात्रपुरस्कारेणसकलजग
दात्मपूजासकत्वार्थकं अतःसर्वसामंजस्यं श्रीदेव्युवाचेति उत्कर्षार्थकंश्रीशब्द
प्रयोगः वचपरिभाषणइत्यस्यलिटिवचिस्वपीतिसंप्रसारणस्य उवाचेतिरूप
कथमितिनिर्देशानेति तस्यसर्वनियंतृत्वमुक्तं सर्वज्ञेतिप्रष्टव्यार्थनिर्वचनयोग्य
त्वं साधकामंत्रयेसाधयंतितेऽनमोलोकोत्तरांसिद्धिं मंत्रादेः सर्वप्रसिद्धत्वात् सि
द्धमंत्रोयदामंत्रीबालिशस्यापिमंत्रेति करदत्तादिशात्याश्चसोपिलोकात्कारे
त्वेनेति फेत्कारिणीस्मरणात् कथंकेनप्रकारेण लभंतइतिप्रश्नः येनय
थालभंतेतत्प्रकारांतरंमेमहंपृच्छन्त्येकथयेतिप्रार्थनेलोट् अन्येषामपिप्रश्न
नात्तत्त्वाहमर्थं मइति तथा चान्यप्रश्ननिरूपितामपकर्षराहित्यंलभ्यते सइति

© Dharmartha Trust J&K. Digitized by eGangotri

कथयेत्यनेनव्रीनीयते देदभ्रियरे पीतिसूत्रात् यथाचवक्ष्योदहं पिनाथकथयाहि
सातांश्चर्षेश्चपिप्रहतिस्तथाशाह्कौलस्माईदौस्पष्टं यद्यपिसिद्धिप्राप्त्युपायोमम
जिज्ञासाविषयइतिप्रश्नवाक्यादेवानादिनात्पर्यबलेनस्वकथनप्रतीयतएव
तथापिस्पष्टार्थंकथनीयेत्युक्तिः श्रीशंकरउवाचेतिस्पष्टं विनेति पूजापंच
विधा तदुक्तं मंत्रतंत्रप्रकाशे पूजापंचविधाप्रोक्ता पंचरात्रादिपंचके तास्त्राभि
गमनंचोपादानेज्याध्यानयोगकाः तत्राभिगमनेनाममंत्रिभिः परिगम्यते सं
मार्जनोपलेपादिसंस्कारोदेवमंदिरे उपादानेभवेद्देवपूजासाधनमेलनम्
ततश्चापिभवेदिज्यागंधपुष्पादिभिः पुनः पीठपूजान्तदेवस्यसांगावरणपूज
ने मंत्रार्थभावनापूर्वंजपोमंत्रस्यकीर्तितं तत्काव्याध्ययनेसम्यक्त्वाध्यायो
मंत्रिभिः स्मृतः गुरुदेवात्मनामैक्यभावनेयोगउच्यते ध्यानरूपप्रपंचसारे
योमनसिदेवतायाभावः स्यादेस्यमंत्रिणः सम्यक् संस्थापयेद्यत्तत्रेत्येवंध्या॰
नेवदंतितत्त्वविदः गयपशब्दात्स्वार्थेप्रत्यायएर् सचत्रिविधः तथाचविश्वहेस्वरा

© Dharmartha Trust J&K. Digitized by eGangotri

तंत्रे निजकर्णगोचरो यो मानसः स जपः स्मृतः उपांशुर्निजकर्णस्य गोचरः परि
कीर्तितः निगदस्तु जनैर्वेद्यस्त्रिविधो जप ईरितः बलिभेदमाह तंत्रे द्विविधो ब
लिराख्यातो राजसः सात्त्विकस्तु बुधैः राजसो मांसरक्ताढ्यः फलत्रयविभूषितः मधु
पायससंयुक्तो मधुरत्रयलोलितः सात्त्विको मांसरहितः शेषमन्यत्तु राजसवत्
अत्र लभेत इत्यत्र कर्मानुक्तेः पूर्वश्लोकस्य सिद्धेरध्याहारः अत्र सिद्धिकामस्यानियोज्य
त्वे सिद्धेः फलत्वे तावद्रात्रिसत्रन्यायेनायाति पठनीयं सदा देवीति विधौ भाव्या
विशेषानभिधानात्तदाकांक्षायाः सत्त्वात् न चैतत्पूजादिफलद्वेषस्यैवानुवादमात्र
मिति प्रधानाधिकारेण निर्वाहे अंगेन कल्पनस्यासंभवात् अन्यथा प्रयाजादाव
पि तत्कल्पनापत्तेः अन्यत्र पूजादिव्यतिरेकेण सिद्धिलाभाभिधाने परार्थत्वा
दर्थवादमात्रे अंगेषु फलश्रुतिरर्थवादः इति न्यायात् अन्यथा तद्विधानवैयर्थ्य
ापत्तेः एवं च स्तोत्ररूपगुणमात्रविधानमेतदिति अंगत्वमात्रग्राहकमा
नाभावात् सिद्धिं कथं लभेत इति कथमावाप्तायामस्य प्रहन्याजपायुपा

© Dharmartha Trust J&K. Digitized by eGangotri

ना॰स॰
टी॰
३

कारकसिद्धावपि अनेकफलकामनया स्तोत्रपाठविधेः प्रत्यक्षत्वात् अवेष्टि
न्यायेनैतत्पाठमात्रमपि प्रधानेनोच्यं नन्वत्रैतयान्नाद्यकामं याजयेदिति
दृष्टयकविधिश्रवणादवेष्टियागस्य स्वतंत्रकर्मत्वे प्रकरणवशाद्राजसूययागता
मिति सिद्धांतः प्रकृते तु पठनीयमिति विधिरंगतयोपपन्न यइदं पठति स्तो
त्रमित्यादीनां तु यच्छेषाय नियद्धत्वान्न विधित्वसंभवः पठनीयमित्यंगविधिप्रा
प्तस्यैवानुवादसंभवादिति चेत्सत्यं अत्रापि शिवस्यानेन प्राप्याामित्यादिदेशवि
शेषपुरस्कारेण पाठफलसंबंधश्रवणाद्यः शृणुयादिति निःश्रितविधिसमभि
व्याहारात् न हि श्रवणस्यागत्यं वा यत्के किंचिदस्ति नापि रागादित्वस्तत्प्राप्तिः एते
भ्यः शृणुयादित्यस्य पवक्षरहृयोगितेय प्रामाण्यं तावहि विषमावपर्यक तथाच वाश
हेन पाठाविधिरवपर्यु सीकार्यः नैवं मदीक्षितस्याप्येतत्पाठाधिकारापत्तेः
इष्टत्वात् अत एव स्तोत्रांतरेष्वपि सर्वशिष्टानां तथानुष्ठानमिति दिक् नाम्नामिति
आदशाभ्यः संख्याभ्य संख्येये चेति भाष्योक्तेः षष्ठी अशेषतत्वतिहितीयार्थे तसिल् अथ

३

वाभावप्रधानात्तृतीयार्थे अथवा उपेति तं क्रियमपादाने सर्वतंत्रादेरुत्पत्तेरित्यर्थः
कुशलात्प्रवर्तितीतिवत् यद्यपि दितयोगे वत्र्यर्थाभावस्तथापि भक्तानामित्य
त्रयोक्तोऽनुसृताच्छेषपाषष्ठी भगवत्पादाश्रवणप्रहृत्तत्वदेवं स्पृष्टमेवमिति नवकमंबं तथा
पि अस्यावश्योपादेयत्वसूचनार्थं तत् नामास्मि वच्मीत्यादिवत् तदेवं वक्तारो
वेयाः सिद्धिकामोक्षिकाश्रीसिद्धिः प्रयोजनं नामसह संप्रतिपाद्यं तेन ग्रंथस्य
प्रतिपाद्यप्रतिपादकलक्षणः संबंधः भवति प्रशस्यादौ तेन वक्तव्यः संबंधः सप्रयोजन इति
प्रशस्यादौ तेन वक्तव्यः संबंधः सप्रयोजन इति प्रकृतत्वात् विनेति यदि तृतीया
र्थे निपातस्य प्रयोगः येन फलं लभते तत्फलं फलैर्हेतुः हेतुहेतुमतोरभेदा
यथा अन्यथा प्रयोजनाभिहारादिव्यतिरेक प्रयुक्त फलस्यात्रानुक्तत्वा दसंगततैः
स्यादिति ध्येयं इदानीमस्य महाप्रयोजनतां प्रकटीकुर्वन् ऋष्यादीन् वक्तुमार
भते अस्येत्यादिना गद्येन तेषां ज्ञानस्यावश्यकत्वात् तथा च हेमाद्रौ याज्ञवल्क्यः
आर्षं छंदश्च दैवत्यं विनियोगस्तथैव च वेदितव्यं प्रयत्नेन ब्राह्मणेन विशेषतः

© Dharmartha Trust J&K. Digitized by eGangotri

ता॰स॰
टी॰
४

स्यतः अविदित्वा तु यः कुर्याद्याजनाध्ययनं जपं होममंतर्जलादीनि तस्य
चाल्पफलं भवेत् यस्तु जानाति तत्वेन आर्षं छंदश्च दैवतं विनियोगं ब्राह्म॰
णं च मंत्रार्थज्ञानमेव च एकैकस्य ऋचः सोपि वेदमालेलिधिवद्भवेत् देवता
याश्च सायुज्यं गच्छत्यत्र न संशयः सर्वोक्तेन प्रकारेण ऋष्यादीन् वेत्ति यो हि
जः अधिकारी भवेत्तस्य रहस्यादिषु कर्मसु येन यदृषिणा दृष्टं सिद्धिः प्राप्ता
च येन वै मंत्रस्य तस्य तत्प्रोक्तमृषेर्भावस्तदार्षकं छादनाच्छंद उद्दिष्टं वाससी
इव चाकृतः आत्मा संछादितो देवैर्मृत्योर्भीतैस्तु यत्पुरा आदित्यैर्वसुभिरु
द्रैस्तेन छंदांसि तानि वै यस्य यस्य तु मंत्रस्य निर्दिष्टा देवता तु या तदाका
रं भवेत्तस्य दैवतं दैवतोच्यते पुराकल्पे समुत्पन्ना मंत्राः कामार्थमेव च अ
नेनैतत्कार्यं विनियोगः स उच्यते यत्नमूलमभूत्ताद्धृतिरपि योहषा अ
विदित्वा छंदो दैवतं ब्राह्मणेन मंत्रेण याजयत्यध्यापयति वा स्थाणुं वर्छति ग
र्तं वा पद्यते इत्यादि अथाह कात्यायनः एतान्यविदित्वा योधीतेऽनुब्रूते जप ४

© Dharmartha Trust J&K. Digitized by eGangotri

त्विजुहोतियजतेयाजयते तस्यब्रह्मनिर्ध्वीर्यंजातयामंभवत्यथांतराश्यगर्तेंका
यते स्याणेवच्छंदोनिप्रमीयते वापापीयान्भवत्यथविज्ञायेनानियोधीते तस्यवी
र्यवदथयार्थविन्नस्यवीर्यवत्तरंभवतिजपितावप्रपंचसारे ऋषिवर्णादिकोपात्
स्तोगत्याप्रापणेनच पात्याभ्यानत्स्वरूपेष्वगुरुः स्यादृषिवाचकः इच्छादानार्थ
कौधातुस्तच्छंदादिस्तुदादिकः तयोरिच्छांददातीतिच्छंदोमंत्राणेवाचकं ग्रात्म
नोदेवताभावप्रदानादेवतेतिच पदेसमस्ततंत्रेषु विद्वद्भिः परिकीर्त्तितं ऋषा
र्गतिप्रापस्तुभयार्थः षिधातुर्ज्ञानार्थः ज्ञानप्रदत्वादृषिपदस्यगुरुर्वाच्यः छंद
धातुरिच्छार्थः दाधातुर्दानार्थः इच्छापदंछंदपदस्यार्थः इतिनैरुक्तव्युत्पत्तिरि
त्यर्थः तथावोक्तंसारसंग्रहे ऋर्वर्णादिस्तुगत्यर्थोधातुः प्राप्त्यर्थकस्तथा षि
र्वर्णोर्थस्तुविज्ञानमा···· प्रापकश्चसः अनयोरूपसंपत्तौऋषिर्गुरुरितीरितः
छंदीतिधातुरिच्छायांदादिदानार्थकोभवेत् छंदोवक्तिमनोर्वर्णाद्वयोरिच्छा
प्रदानतः कौडार्थकाददातीतिसंपन्नेदेवतापदे सायकायात्मनोभावंददातीतिज

© Dharmartha Trust J&K. Digitized by eGangotri

ना॰स॰
टी॰
५

गुर्यतः दिवेः क्रीडार्थाद्देवशब्दः उक्तार्थपरश्चत्वर्थः श्रीरुद्रयामले रुद्रस्य वो॰
॰धकायात्म नरे भागे ऋषिरेको भवत्ततः स्वदोम्यनामयाश्रित्य मनिवेषयस्ता
शिवः अरतिगादिसद्वेनियानननाडास्मिकशब्दः साधुः मूले लग्नकचेजटेत्य
मरः पिंगोग्रैकजटां ध्यायेदिति फेत्कारिण्यां वाक्यप्रमाणपदसागरपारगस्य
लक्ष्मीधराभिधगुरुर्यस्य तनूद्भवेन विश्वेश्वरेण विहिते गिरिजाभिधार्थचिंताम
णिमयमगात्प्रथमो मयूखः १ किरणसहस्राभिर्वैतन्त्रौरेमोहांधकारविच्छेदि
तारानामसहस्रं सर्वोत्कर्षेण वर्तते १ तत्रान्यासामपि स्त्रीतांतानां भगवत्याः
सर्वात्मकत्वस्तवनार्थं नामान्यत्र वर्ण्यंते उक्तं च वराहपुराणे नियोसौम्यानि ना
मानि यानि स्त्रानोद्भवानि च तानि तस्या विशालाक्ष्या द्रष्टव्यानि वरानने कूर्म
पुराणेपि शक्तयो गिरिजादेवी शक्तिमंतो थ शंकरः मत्स्यपुराणे तत्र याव
हितेकिंचिद्ब्रह्मांडेस्मिंश्चराचरे इति दक्षोक्तिः मार्कंडेयपुराणे विद्यास्सम
स्तास्तव देवि भेदाः स्त्रियः समस्ताः सकला जगत्स्वित्यादि अत एव तत्रैव श्रु

© Dharmartha Trust J&K. Digitized by eGangotri

न्यासोवलमाश्रित्ययुष्मसेवातिमानिनीतिष्ठंभोमौ अहंविभक्त्यावक्त्रभिरहस्त्वपे
यंदास्थितेन्यनेनग्रंथेनवैसवादीनांभगवत्याकेवलयोक्तिः संगच्छते लिंगपुरा
णेपि शंकरः पुरुषाः सर्वे स्त्रियः सर्वा महेश्वरी ङ्लिंगशब्दवाच्यायेतेवरुद्राः प्रकी
र्त्तिताः स्त्रीलिंगशब्दवाच्यायाः सर्वाः गौर्याविभूतयः सर्वेस्त्रीपुरुषाः प्रोक्तास्तयो
रेवविभूतयः यस्ययस्यपदार्थस्ययायाशक्तिरुदाहृता सासाविश्वेश्वरीदेवीश
र्वः सर्वोमहेश्वरः शक्तिमन्तः पदार्थायेतेवैशर्वस्यविभूतयः पदार्थशक्तयोया
यास्तागौरीतिविदुर्बुधाः अष्टौप्रकृतयोदेव्यामूर्त्तयः परिकीर्त्तिताः तथाविकृ
तयस्तस्यादेहवद्धाविभूतयः विस्फुलिंगायथांतद्वदग्नौचवहुधास्थिताः जीवाः
सर्वेतथाशर्वांहंहसत्यमपागताः गौरीरूपाणिसर्वाणिशरीराणिशरीरिणां
शरीरिणस्तथासर्वेशंकरांशाव्यवस्थिताः श्राव्यंसर्वंमुमारूपंश्रोतादेवोमहे
श्वरः विषयित्वंविभुर्धत्तेविषयात्मकतामुमा स्रष्टव्यंवस्तुजातंतुधत्तेशंकर
वल्लभा स्रष्टासएवविश्वात्मावालचंद्रार्द्धशेखरः दृश्यंवस्तुप्रजारूपंविभर्त्तिभव

© Dharmartha Trust J&K. Digitized by eGangotri

नेश्वरी इच्छादिशक्तीश्वरो देवः शक्तिदंडः शिरस्यामणिः रसजातमसमारूपं प्रयजानेव
सर्वेशः देवोरमयिनाशंभुशीतावभुवनेश्वरः मेतत्परवस्तुतोऽयत्रे महादेवीमहेश्व
री मेता सएव विश्वात्मा महादेवो महेश्वरः वोद्धव्यवस्तुरूपेव विर्निहरवल्लभा दे
वः सएव भगवान् वोड्डावालेंडशेश्वरः पीठाकृतिरुमादेवी लिंगरूपश्च शंकरः
प्रतिष्ठाप्यविधानेन पूजयंति सुरासुराः येयेपदार्थालिंगाकारेणतेशार्वे विभूत
यः अर्घाभगांकितायेयेतेगौर्याविभूतयः स्वर्गपाताललोकान्तेब्रह्माण्डाव
रणाष्टके ज्ञेयं सर्वं समारूपं ज्ञाता देवो महेश्वरः विभर्त्तिदितत्वत्ता देवी त्रिपुरां
तकवल्लभा देवस्तत्र भवोयत्र भगवान्तकान्तकः सर्वाकारौस्थितावेतौ नरै
श्रेयोर्थिभिः सदा पूजनीयौ नमस्कार्यौ चिन्तनीयौ च सर्वदा समयाचारपूर्व
स्त्रीजातिरूपासर्वत्रसर्वाऽङ्गतियामता साशक्तिरूपा विज्ञेया पुरुषः शिवरू
पवान् एवं च लाक्षणिकत्वमन्येषां नाम्नां द्रष्टव्यं अतएव तदुच्चारणेन तद्देवता
नामग्रहणजन्यफलानि प्रायेण भवन्ति तदैकतामावात् नामग्रहणविधिना

6

© Dharmartha Trust J&K. Digitized by eGangotri

तद्वाचकानामेवोपादानादिति तानि च पूजायां चतुर्थ्यन्तत्वेन विपरिणमयितव्यानि
होमपूजनयोः स्वाहान्यासतर्पणयोर्नम इति स्वनाम सर्वसत्त्वानां मन्त्र इत्यभिधी
यते इति च स्कन्दपुराणस्यैव प्रमाणत्वात् न च तेषां नामत्वमेव नास्तीति वाच्यम्
एतन्नामपाठेन तत्तत्स्वधर्मविशेषे हृद्यादिसंज्ञावत् शाकयच्छेदेन नामत्वे वाच
काभावात् स्तोत्रवाक्यत्वेन पृथक् पापक्षयार्थं प्रयोगो नास्तीति तत्कमेव अ
न्यथा सहस्रनामसंज्ञाविलोपापत्ते एवं च न्यायप्रसिद्धपदार्थे कूर्मपुराणाद्यु
क्तसहस्रनामस्तोत्रेषु नामभिः कण्ठरवेण पूजाविधानमपि संगच्छते अत्र च
एवं नाम्नां सहस्रेण तुष्टाव वृषभध्वजं स्नापयामास च विभुः पूजयामास पङ्क
जैरिति लिङ्गपुराणीयं ततो नामसहस्रेण तुष्टाव परमेश्वरं प्रतिनाम सप
द्मैश्च तमिष्ट्वा वृषभध्वजं इत्यादित्यपुराणीयमाख्यानमप्युपोद्बलकं भव
तीति दिक् नमस्कारस्वाहेति चतुर्थीविधानात् तत्र सौकर्यार्थं रूपनिर्णय
प्रक्रियां वक्ष्यामः आदौ तेषु चतुर्थ्येकवचने याडापः इति याटि कृते वृद्धिः नद्य

© Dharmartha Trust J&K. Digitized by eGangotri

ता॰स॰
टी
७

नेषु आटिपाणिकृतेहृद्भिः इकारोकारान्तेषु ङिः तिङ्सु अश्वेत्यपसे विसर्गाविया
नाङ्गुणः अन्यदा नदीसाम्यमेव तत्र रूपे भेदो याह दिकः कार्य्यं हलन्तानां
तु पुंवद् देवरूपमिति दिक् तत्र प्रधानत्वात्सर्वमंगलायतनत्वात् देवतामा
नाम प्रथममनुपन्यस्यति ॐ तारेति ॐ अत्र व्युत्पत्ति महाथर्वणीश्रुतिः ता
रयतीति तारेति एवं पञ्चादितादजिति प्रकारः सूचितः भैरवीतन्त्रमपि ता
रकत्वात्सदा तारा सर्वमोक्षप्रदायिनीति अवश्यपेक्षायां वसंसारएव तथा
त्येन पर्यवस्यति अतएव मोक्षरूपपरमपुरुषार्थहेतुत्वं वक्ष्यते तत्राग्रे वव
नेषु स्फुटीभविष्यति अथवा तारः प्रणवः तत्पुरःमंत्रत्वात् वेदाद्यमनुखे पुरःका
चे तारा त्रिभुवनतारिणीति फेत्कारिणीयवचनात् प्रणवो ह्यस्य सा ब्रह्मस्वरूप
तया ख्यापावकत्वाद्वा ॐतत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृत इति श्रुतेः सु
ग्रीवभार्य्यारूपत्वाद्वा तथाच मत्स्यपुराणे दक्षप्रनिर्देशुक्तिः तारा किष्किंधप
र्वतेश्वरि बृहद्देवासमनता तारा सुग्रीवगुरुयोषिता रिति विश्वः १ रात्रिरिति देवा ७

© Dharmartha Trust J&K. Digitized by eGangotri

स्त्वरूपत्वात् रात्रिरूपा यतो देवी दिवारूपो महेश्वर इति वचनात् रात्रिपर्य्यटनेनैव रात्रौ
शक्तिप्रपूजनं प्रकुर्वीत कथमीशानमङ्गकः कौलिको भवेदिति तस्याः पूजाकालत्वे
नोक्तं निशि भ्रमन्ति भूतानि शाकयः मूलभूत इत्यादिस्मृतिवचनाच्च ब्रह्मवचने
नमेनाकुंदिगतायां भगवत्या स्वयाश्यामीकृतत्वाद्वा शक्तिविशेषरूपत्वाद्वा २ म
हारात्रिरिति योगिनीविशेषरूपत्वात् एतत्पूजायां तस्याः प्रशानत्वाद्वा ३ केचन्दी
रतंत्रे अर्द्धरात्रात्परं यच्च मुहूर्त्तद्वयमेव च सा महारात्रिरुद्दिष्टेति द्वितीयतृतीयरात्रि
प्रहरयोर्महानिशात्वं महानिशा तु विशेया मध्यस्थप्रहरद्वयमिति हेमाद्रौ देवलवच
नात् अत एव वीरपूजा महेशानि जामिन्याः प्रहरे गते इति वीरचूडामणावुक्तम् ४
कालरात्रिरिति तदुक्तं वराहपुराणे संहारकारिणी देवी कालरात्रिश्च या विदुः
संहारिणीति सा देवी कालरात्रिः प्रकीर्तितेति तथा वज्ञानार्णवे रुद्रस्तु परमेशानशि
वो निश्चल एव हि प्रसेती रुद्रशक्तिस्तु नमोरूपा वरानने एतेन ब्रह्मांडनाशकत्वेनेश्व
रसिद्धिरिति तत्र प्रमाणमपि सूचितं तथा वन्यायकुसुमांजलौ ब्रह्मांडादिद्व्यणुक

© Dharmartha Trust J&K. Digitized by eGangotri

ता॰स॰
टी॰
८

पर्यंतेहिजगत्प्रसवत्वादिनाप्येष विनाशयन् पाययमानश्चटवत् सर्वभूतानि
कौंतेयप्रकृतिंयांतिमामिकां कल्पक्षयेपुनस्तानिकल्पादौविसृजाम्यहमि
ति यद्वास्य प्राधिदेवतात्वात् तथाशौनकः एवमादीनिवाक्यानिश्रुत्युक्तानिबहू
न्यपि स्वभावात्यानानिवेत्तेषांकालरात्रिमिदेवता प्रजाविधानेपूर्वोक्तंकुर्यादत्रा
पियत्नतः ४ कपालिनीति स्यात्कर्परः कपालोस्त्रीत्यमरः कपालयति मृ
द्धोद्धंसीतिस्वामी उक्तंचफेत्कारिणीतंत्रे कपालोत्पलसंयुक्तसव्यपाणि
युगान्वितामिति ५ कालिकेति कालश्यामलमेवकाश्यत्यमरः ङीषंतात्स्वा
र्थेकः उक्तंहिमार्कंडेयपुराणे तस्यांविनिर्गतायांतु कृष्णाभूत्सापिपार्वती का
लिकेतिसमाख्यानाहिमाचलकृताश्रया तथाचवीरचूडामणौ याकालीसा
महातारायातारा कालिकास्मृता उभयोर्भेदभावेनसिद्धिहानिस्तुजायते का
लीतंत्रे यथाकालीतथातारा यथातारातथोन्मुखी उन्मुखीछिन्नमस्तेत्यर्थः
अतस्तद्विषय कवचसाम्यमपात्रातिदेशाद्विषयेकवचत्रयं गंधर्वतंत्रे यथाकाली

© Dharmartha Trust J&K. Digitized by eGangotri

तथा तारायां तारा कालिकैव सा उभयोर्न हि भेदोऽस्तीति अथवा मस्तकशीर्षं नलेखु
कं इति विश्वः ललाटमलिकं गोधिरित्यमरः केऽमूर्द्धनि अलिकानि कपालानि य
स्याः सप्तमी विशेषणे बहुव्रीहाविति सप्तम्याः पूर्वनिपातविधानादेव ज्ञापकाद्व्य
धिकरणेऽपि बहुव्रीहिः तथा च तन्त्रचूडामणौ श्वेतास्थिपट्टिकायुक्तकपालपंच
शोभितां पंचमुद्राविभूषितामिति फेत्कारिण्यां ६ कामदेति कामः स्मरेऽभि
लाषे चेति विश्वः तं ददातीति आत इति कः इच्छाविषयीभूतार्थदानेतात्पर्यं उक्तं च
फेत्कारिण्यां यामवाप्य महात्मानो धर्मकामार्थमुक्तिषु नासाध्यमेति वै किंचित्
कवयः शुद्धबुद्धयः ७ मायेति तदुक्तं कूर्मपुराणे तस्य सर्वजगन्मूर्तेः शक्तिर्मायेति
विश्रुता तयेदं भ्रामयेदीशो मायावी पुरुषोत्तमः मायान्तु शर्वशक्तीनामिति निवृत्त
श्रोक्तं अत एव मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं इति श्रुतिः तत्र मायेति
सत्वरजस्तमसां साम्यावस्था मूलप्रकृतिरिति सांख्यमते वेदान्तिनां तु आवरण
दिशक्तिमत्यविद्यैव तदर्थः शिवमेवेश्वरं प्राहुर्माया गौरी विदुर्बुधा इति लिंगपु

© Dharmartha Trust J&K. Digitized by eGangotri

राणे ऽक्षरस्याप्रकाश्यत्वमित्युक्तत्वात्ताद्दश्याणश्चाविद्याविषयत्वात्तद्रूपत्वोक्तिः यद्वामा
याबीजस्वरूपमेवत्वात् प्रत्येकबीजानामपि मंत्रत्वश्रवणात् बीजमंत्राः स्वतंत्रा
स्सत्वारिण्याः सर्वसिद्धिदाः ८ महामायेति महेश्वरादिवर्गादे महामायाहरे
श्चैषा तया संमोह्यते जगदिति मार्कंडेयपुराणात् यद्वामयज्ञानरूपितायास्त्व
सायान्मायात्वानेवपुनास्त्विते निर्गुणदर्शनाच्चमायापदंज्ञानपरम् स्फुटैवेदमदो
तसिद्धौ तत्रमहामायापदहत्यवर्णोन्यैतत्परमितिबोध्यं ९ महोत्सवेति
महान्उत्सवोऽस्याः महत्उद्धवउत्सवइत्यमरः अतएवपुनरुक्तवदाभासोयमलंका
रः किंवामहत्तेजः तत्रप्रतिवादिनामर्थानुरोधात् ततोदमत्त्वेणाऽस्मात् क्षिप्
ईद्दशाः सर्वोपशाः पूजादिरूपोपयथ्याः यत्नः सर्वोषशैयागाः इत्यमरः उक्तंदिहरुद्र
यामले वादेमदसियावाक्यस्तंभिनीप्रतिवादिनां विद्याहानिकरीवैरिविड्वेषा
वलिदानतः फेत्कारिणीतंत्रे मंत्रसत्तानमात्रेणाऽनुभावद्वयंभवेत् ताल्का
लिकीवकविताप्रैरनभिभाष्यता १० महादानरतेति महादानमत्रविद्यादान

© Dharmartha Trust J&K. Digitized by eGangotri

त्रूपं विद्यादानात्परं दानं श्रूयते नाधिकं किलेत्यादित्यपुराणात् तथा वोक्तं कालीतंत्रे
संस्कृताः प्राकृताः शब्दा लौकिका वैदिकास्तथा ते सर्वे वशमायांति साधकस्य च नान्य
था रुद्रयामले अव्याहतमतिः प्राज्ञो विजयी वाक्पतेरपि मत्स्यसूक्ते यद्युक्तान्यानरोभा
तिवाचस्पतिरिवापरः ११ यज्ञेति इज्यते पूज्यते इति यज्ञा यज्ञेन यज्ञमयजन्त देवा इत्यत्र
मंत्रभाष्यकारैरपि कर्मपरत्वेन व्याख्यानात् यद्वा यज्ञो यस्यास्तद्देशभूतत्वादित्यर्थ
देवतोद्देश्यकद्रव्यत्यागस्यैव यज्ञत्वात् १२ यज्ञोत्सर्वविभूषितेति यज्ञेरूपयागादौ उत्स
वेन शंकाराहित्यादिरूपेण साधकनिष्ठेन विभूषिता संतुष्टेति यावत् उक्तं च रत्नार्णवे
विचिकित्सापरो मंत्री जायते गुरुतल्पगः अतएव महेशानि निर्विकल्पः सदा भवेत् १३
चंद्रवक्त्रेति चंद्र इव वक्त्रं यस्याः इति बहुव्रीहिणा उपमा प्रत्याय्यते तदुक्तमाचार्यदंडिना
समासश्च बहुव्रीहिः शशांकवदनादिषु सादृश्यप्रसूचक इति शेषः १४ चकोराक्षीति
चकोरस्याक्षिणी इवाक्षिणी यस्याः उपमानपूर्वपदो बहुव्रीहिरुत्तरपदलोपश्च बहु
व्रीहौ सक्थ्यक्ष्णोः स्वांगात्षच् षिद्गौरादिभ्यश्चेति ङीष् १५ चारुनेत्रेति सुंदरे रुचिरे चारु

© Dharmartha Trust J&K. Digitized by eGangotri

ता॰स॰
टी॰
१०

इत्यमरः रम्यवस्त्रेति वार्थः कर्पूरेंदुनिभा स्मितां वरयुगामिति मंत्रभेदे ध्यानोक्तेः १६
सुलोचनेति शोभनानि लोचनानि यस्याः इत्यस्वपदविग्रहो नित्यसमासत्वात् १७ त्रि
नेत्रेति चंद्रसूर्याग्निमयलोचनेति भावः तथा नीलतंत्रे बालार्कमंडलाकारादि लोच
नत्रयभूषिताम् १८ चलपद्माक्षीति चलत्वेन नेत्रचापल्यार्थं विशेषणं स्पष्टमन्यत् १९
कुरंगाक्षीति पदेः कुरंगो हारिणो मृगः स्यादिति हलायुधः २० मनोहरेति रम्येति भा
वः अविद्यापहारकत्वाद्वा यद्वा मनसि हरो यस्यास्तद्विषयकानुरागवत्त्वात् २१ ब्रा
ह्मीति ब्रह्मो जाताविति निपातनादंतलोपः तथा च वराहपुराणे देव्या मूर्तित्रयं उक्ता
या सा ब्राह्मी शिवा मूर्तिस्तपा सृजत वै प्रजाः सौम्यरूपेण सृष्टाणी ब्राह्मी सृष्टिविधा
नतः २२ नारायणीति उक्तं हि मत्स्यपुराणे नारायणी सुपार्श्वेतिति वराहपुराणे
या सा रक्तेन वर्णेन सुरूपा तनुमध्यमा प्रोवाच क्रयरा देवी वैष्णवी तेजगामह एषा
नारायणोपास्या विद्या सर्वसमृद्धिदेति एतदीयभेदोक्तेर्वा २२ ज्योत्स्नेति चंद्रो विध
नेत्रस्तेन तथा ज्योत्स्ना तमिस्रेत्यादिना निपातः यद्वा स्नायद्वेशुद्धिपरे स्नाशोवेभावे।

© Dharmartha Trust J&K. Digitized by eGangotri

क्विप् उत्कृष्टास्त्रायस्याः इति वेश्मर्थे बहुव्रीहिः ज्यामौर्वी ज्या वसुंधरेति शाश्वतः ज्यायां भू
मौ उत्कृष्टेति तत्पुरुषः अन्येभ्यः सुद्विदेवेभ्यः उत्कृष्टा भक्तानां सुखदातृत्वातिशयेहेतुरित्यर्थः २४
चारुकेशीति स्वांगादिति ङीप् २५ सुलोचनेति सुलोचः सुखेन लोचयितुं शक्यः नो
नमस्कारो यस्याः नमतेर्डप्रत्ययः पकारान्तरे कोशे तथादर्शनात् सुखाराध्येति यावत् २६
वाराहीति प्राक्तिविशेषरूपत्वात् काशीखंडे अन्यास्तिकाश्यां वाराही कृतवा
राहसन्निधौ नो प्रणम्य नरो भक्त्या विपदब्धौ निमज्जति अथवा वहाहिः सर्पश्रेष्ठः
अहिर्हेत्रा सुरे सर्पे इत्यभिधानात् तस्येयं वाराही अतोभ्यः सर्वमहं न्यास्वि मूर्तिं नागत्रय
ष्टगत्रयष्टगीनिभावचूडामणिवचनात् अतोभ्यश्चर्षिरेतस्याहृहतीच्छंदेदं विनश्यति
अतोभ्य नागसेपवृजटाजूटं वरप्रदामिति तंत्रचूडामणिवचनाच्च वामनपुराणे
महोग्रसुधालारौद्रादंष्ट्राष्टनवसुंधरा वाराहीपृष्ठतोजाताशेषनागोपरिस्थिता
वाराही मातृभेदे स्याद्वृष्टिनामौषधेपि चेति विश्वः २७ वारुणीति वरुणस्त्ररुभेदस्क
प्रतीचीपतिसूर्ययोरिति विश्वः यद्वा वारुणी वंशिष्टः तस्येयं तदाराध्यत्वात् वशिष्टा

© Dharmartha Trust J&K. Digitized by eGangotri

तास·
टी·
११

रापिताद्देवीनच शीघ्रफलाय तत्र इत्यादौ श्रणयोह्वारादेहकत्वात् २८ विद्येति मुक्तिहे
तुज्ञानं तथाच मार्कंडेयपुराणे सा विद्या परमा मुक्तेर्हेतुभूता सनातनी ज्ञप्पइत्य
त्तुहन्तो विद्यया देवलोको देवलोको वै लोकानां श्रेष्ठस्तस्माद्विद्यां प्रशंसंतीति श्रुः
तेस्तद्रूपत्वाद्वा यद्वा समयाचारे मंत्राः केचित्प्रकथ्यंते केचिद्विद्याः प्रकीर्तिताः
पुंनाम देवता मंत्रा विद्या स्त्रीनामतः स्मृताः शारदातिलके प्युक्तं मंत्रविद्याविभे
देन हि विद्या मंत्रजातयः मंत्राः पुंदेवता ज्ञेया विद्याः स्त्रीदेवताः पुनः २९ महाविद्ये
ति तथाच मुंडमालायां काली तारा महाविद्या षोडशी भुवनेश्वरी भैरवी छिन्नम
स्ता च विद्या धूमावती तथा बगला सिद्धविद्या च मातंगी कमलात्मिका एता द
श महाविद्या महाविद्याः प्रकीर्तिताः अत्र तंत्रडलेभालोके षडाम्नायनमस्कृताः ३०
महेश्वरीति पुंयोगलक्षणो ङीष् महाकलेमहेश्वरीति मत्स्यपुराणात् ३१
पिंगाक्षं चितकेशाति त्रहि चस्मह्वैपाद पूरण इत्यमरा बकारो वर्णः एवं तथा
दीनामपि वोध्यं पिंगाक्षां कुंचितावक्राग्रकेशा यस्याः इति त्रियदो वहुव्रीहिः उमे

११

© Dharmartha Trust J&K. Digitized by eGangotri

तियोगिनं कालपरिच्छेदा तथावादे तात्मतत्त्वरूपेत्यर्थः तदुक्तं कूर्मपुराणे मां विद्धि
परमां शक्तिं महेश्वरसमाश्रयां अनन्यामव्ययामेकां यां पश्यन्ति मुमुक्षवः ४० नित्यम
पीति नित्यं ब्रह्मस्वरूपं ततोऽन्यदा नैमित्तिकमिति तत्स्वरूपेत्यर्थः कूर्मपुराणे शक्तिशक्तिम
तोर्भेदं वदन्ति परमार्थतः अभेदं चानुपश्यन्ति योगिनस्तत्त्वचिन्तकाः परमार्थतस्त्वा
स्यान्तराद्वैतसंवेद्यः ४१ नंदेति नंदयति भक्तानिति तथा नंदा हिमवतः पृष्ठे इति मात्स्ये ४२
भद्रेति भद्रं करोतीति एवं नात्यन्ताय विरूपे भक्तानां विशेषः तिथिविशेषा वा अहं
भद्रा च भद्रा अहं नावयोरन्तरं क्वचिदिति विष्णुत्यक्तामहात्म्यो मम पूजां करोति यः
तस्य पूजाफलं तस्यास्तेनाहमवमानितेति नवरात्रिप्रकरणे सर्वं निवेद्य उदाहृतं वचना
त् ४२ नीलसरस्वतीति गीर्वाग्वाणी सरस्वतीत्यमरः ब्रह्मलोके सरः समाश्रित्य शा
पान्नदीभूता लोके भवतीति पदे वेदिकायां उक्तं च श्रीरुद्रयामले एतस्मिन्नेव
लेवकाले तु मेरोः शृंगपरायणः जयजाप्यं समास्थाय त्रियुगं च ततस्थितः मम मो
वक्त्रालिंगत्य तेजोराशि विनिर्गता ह्रदे चोलेति पत्येव नीलवर्णा भवाम्बरा ४४ गा

© Dharmartha Trust J&K. Digitized by eGangotri

यत्रीति गायंतंत्रायतेयस्माद्गायत्रीतेनसास्मृतेति गायत्रीनिप्रपंचसारादयः आतो
नुपसर्गे इतिकः गौरादित्वात्ङीष् इतियदचंद्रिकायां गायत्रीब्रह्मपुराणे साहि
षागयांस्तत्रे प्राणावैगयास्तान्पङ्क्त्यास्त्रेतेनसागायत्रीनामेति तदिदंव्युत्पत्तिद्वयम
पिनिबद्धं पद्मपुराणे गायंतंत्रायतेयस्माद्गायत्रीतेनसास्मृता गयाः प्राणाः स्मृता
नित्यंश्रुतीनांपारदृश्वभिःत्रायतेजपतः प्राणान्गायत्रीतेनवास्मृता मत्स्यपुराणे
गायत्रीवेदवदने इतिदेव्युक्तिः गायत्रीवाइदंसर्वंयदिदं किंचेत्यादिवाक्यो गायत्री
पदेब्रह्मपरमितिवेदान्तिनः ४५ सुचरित्रेति शोभनंचरित्रमस्याः वरेण्येणादि
कहृत्रः ४६ कौलव्रतपरायणेति कुलसंबंधित्वात्कौलव्रतंतदागमोक्तं तत्परा
यणासक्तेत्यर्थः आश्रयेतसदाभीष्टपाणपाणपदेविडरितिशास्त्रतः महाचीनक्रमे
णैवब्रह्मज्ञानाप्तिफलप्रदेति कालीतन्त्रात् ४७ हिरण्यगर्भेतिहिरण्यग्राहेनतदं
डग्रहणं तदुद्भवत्वात्तथा तदंडमभवद्धैममितिपुराणात् तदुक्तंज्ञानार्णवे ब्रह्मणः
परमेशानि मातृत्वेसृष्टिरूपके वामाशक्तेस्तुविज्ञेयब्रह्माप्रोक्तोनसंशयः कूर्मपु

© Dharmartha Trust J&K. Digitized by eGangotri

मकुं वितेनततमित्यमरः पिंगोगैरैकजटां ध्यायेदित्युक्तेः कुंचितं तं सामुद्रिकोक्तता-
त् २२ महायन्त्रस्वरूपिणीति वेदस्वरूपत्वात् यद्वा महायन्त्रं देवताकर्तृसांन्मी
येरूपयति पश्यतीति तथा सतीरूपे इति भावः साह्रनाहृतापि स्वकीयवंशुद्धात
जगतेति श्रीभागवतादौ प्रसिद्धं यद्वा महायन्त्राणां स्वं आत्मानं रूपयति रूपवंतं
करोतीति तथा स्वर्गादिष्टकार्य्यतानिरूपितकारणतानिर्वाहकदेवताप्रीति-
रूपव्यापाराश्रयत्वादिति भावः त्वमेव वेनमिंद्रः प्रजयापशुभिश्च तर्पयतीति श्रु-
त्या देवताप्रीतिरेवाशुविनाशिनां यागादीनां व्यापार इति वेदांतिनः नैयायिका-
मतेपि अदृष्टाधिष्ठातृत्वात् तथा यद्वा यत्नेषु स्वमेव रूपं स्वरूपं तद् अस्याः इष्टदे
वते हि यंत्रस्वरूपमिति मीमांसकसंप्रदायः एतेन सर्वदेवतात्मकत्वं २२
गौरीति गौरो रुणे सितेपीते इत्यमरः गौरादित्वात् ङीष् स्कंदपुराणे दक्षामि
देवते दिव्यं वपुः कनकसन्निभं गौरीति लोके व्याता च महेवं कमलोद्भवं काल्य
कुब्जेन तथा गौरीमत्स्यपुराणे [illegible] चंपकवर्णेति चंपको हेमपुष्पक इत्यमरः स्त्र

© Dharmartha Trust J&K. Digitized by eGangotri

ना॰स॰
टी॰
१२

12/2

पुष्पं बिल्वपत्रं च चंपकं नागकेसरम् इति मुंडमालोक्तिर्वा यद्वा रक्तोत्पलेमहीलक्ष्मीस्तंभ
नेपुष्पकमिति सोमप्रकरणे वीरचूडामणउक्तेः ३५ कृष्णांगीति यथाप्रशस्तेत्र्यव
लग्रादीनां तन्नुत्वादित्यर्थः त्वन्मामाकोटरादीति भद्रकालीध्यानाद्वा ३६ कुलध्व
जितेति कुलशब्दो द्रव्यविशेषेष्वागमपरिभाषितः तद्वकालीतंत्रादावुक्तं ३७
सर्वानंदस्वरूपेति मोक्षानंदस्यैवान्येषामंतर्भावात् एतस्यैवानंदस्य वा सर्वा
णि भूतानि मात्रामुपजीवंतीति श्रुतेः यावानर्थ उदपाने सर्वतः संप्लुतोदके
तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानत इति भगवदुक्तेश्च ३८ सर्वसंकटतारिणी
ति तदाहुराथर्वणश्रुतिः अथ तारिणी भयतारिणी ब्रह्महत्यातारिणी महापा
तकतारिणीमिति मार्कंडेयपुराणे रक्षांसि यत्रोग्रविषाश्च नागा यत्रारयो दस्युबला
नि यत्र दावानलो यत्र तथाब्धिमध्ये तत्र स्थिता त्वं परिपासि विश्वं ३९ नित्येति क्लीबे
पुंलिङ्गाद्यमते स्यात्त्रिष्वेषां भेद्यगामि यदित्यमरः वस्तुदेशकालकृतपरिच्छेदरहितेत्य
र्थः भेदगतियोगित्वं वस्तुपरिच्छेदः अत्यंताभावप्रतियोगित्वं देशपरिच्छेदः ध्वंसप्र

© Dharmartha Trust J&K. Digitized by eGangotri

राणे मयैकरोनिसकलं त्वस्याः कार्य्यमिदं जगत् नकार्यं नापिकरणमीश्वरस्येतिस्मर
मः ४८ मूर्गर्भेति मूमिर्गर्भेयस्याः तदुद्भवत्वात् वस्तुतस्तु त्रिकोणान्तर्गतयंत्रत्वा
त् सयोनिगोमयेनाष्टपत्रमब्जं सुशोभने भूपुरेयस्तुपत्राढ्यं यंत्रमेकजठात्मकं
मितिफेत्कारिणीवचनात् गोमयेनेत्यत्र चंदनेनेतिपाठांतरं देहात्मनोर्यथाभेदो
यंत्रदेवतयोस्तथेतिस्र भेदारोपनात्पर्य्यकें कौलावलीयाद्येतिपरमार्थः ४९ वि
श्वगर्भेति संहारकत्वेनकुक्षिगतलोकत्वात् तद्रूपेणसर्वानुस्यूतत्वाद्वा अस्ति
भातिप्रियंरूपंनामयेत्यंशपंचकं आद्यंत्रयंब्रह्मरूपंजगद्रूपंततोद्वयं खंवाताग्नि
जलोर्वीषुदेवतिर्यङ्नरादिषु अभिन्नाः सच्चिदानंदाभिद्यतेरूपनामनी इतिवेदान्तोक्तेः ५०
यशस्विनीति भूस्विप्रशंसायांनित्ययोगेऽतिशायनेवाऽस्यायेत्यादिनाविनिप्रत्ययः
यशश्चब्रह्मात्मतयासकलवेदान्ततात्पर्यविषयत्वरूपं तच्चोत्तरमीमांसायांप्र
थमाध्यायेस्पष्टं ५१ हिमवत्तनयेति हिमवान्निषधेविंध्यइतिपर्वतभेदेषुम
रः मत्स्यपुराणेहिमाचलंपतिनारदोक्तिः जननीसर्वलोकस्यसेभूतात्मजभावि

५

नी शिवेयं पावनीयेव तल्लिङ्गे पावकश्रुतिः कूर्मपुराणे अहं वै याचिता देवैः संजाता
परमेश्वरात् विनिंद्य दक्षे पितरं महेश्वरविनिंदकं धर्मसंस्थापनार्थाय तस्य दाराधन
कारणात् मेनादेहसमुत्पन्ना तामेवपितरं श्रिता ५२ दिव्येति दिगादित्वाद्यत्
दिव्यं स्वर्गके दिव्ये वलौ दिवि भवे न्यवदिति विश्वः वीराचारप्रियत्वादित्यर्थः
वीरदिव्ययोरल्पभेदत्वात् दिव्ये वीरे न भेदोस्ति यद्वेदं तत्तु कथ्यते पूर्णतेजापिनी।
नो मधुरः कलानावप्यसंभृतः दिव्यस्तु देववत्प्रायो वीरश्चोद्धतमानस इति भाव
चूडामणिवचनात् ५३ दिव्याम्बरविभूषणेति स्पष्टार्थं तदुक्तं पुराणे अंडजैर्वा
पिवस्त्रैरभ्यर्च्य शैलजां संभूषाभरणैः प्राक्चक्रवर्तित्वमाप्नुयात् अंडजं कौर्यासं
यद्वा दिव्यं उत्तमं अंबरं ब्रह्मरंध्ररूपमाकाशं तद्विहारित्वात् तदुक्तं नीलतंत्रे उ
त्पाद्यचोत्तरेयामे चिंतयेदुग्रतारिणी मूलादिब्रह्मरंध्रांते विशन्तं तु स्वरूपिणी
जगन्मातेति सृष्टं महदित्यादिना उक्तादेवीनिपातो जगच्छब्दः सर्वे ब्रह्मादयोऽप्ययं
मदंशाभावसंभवा इति कुलचूडामणिवचनात् ५५ जगद्धात्रीति धारणत्वा

५४

© Dharmartha Trust J&K. Digitized by eGangotri

लनाद्वान्ननुयोगे षष्ठ्या स्नुजकाभ्यामिति सान्तवेयकत्वनुग्रहणेन ऽ ज्ञापनात्तदंतेन
षष्ठीसमासः तथाचश्रुतिः एतस्यवाअक्षरस्य प्रशासने गार्गि द्यावापृथिवी विधृ
ते तिष्ठत इति ५६ जगतामुपकारिणीति उपकरोतिधनादिदानेनेत्यर्थः भाष्यम
नेस्तनुग्रहणस्य उपसर्गनिवृत्त्यर्थत्वाभावात् णिनिसिद्धिः जगत्पदस्य ससार्थात्म
परे तया सर्वं जन्मोदता त्रीति तत्पार्थः ५७ ऐंद्रीति ऋज्रेंद्रेत्यादिना इंद्रशब्दो निपातः
वज्रपाणिर्महादेवशचीशैलेंद्रकन्यकेति लिंगपुराणं ५८ सौम्येति सोमस्येयं
सौमा दितिष्यपरक्षोदमत्वात्ङीषभावः ५९ याम्येति यमस्येयं याम्या दित्यदि
तीतिसूत्रेयमाद्येतिवामनोक्तेर्ण्यः भाष्यमतेतत्सञ्ज्ञमयडिति दीक्षिताः याम्यापुन
र्यातनाद् इत्युदयनाचार्याः यमःस्वयं हरो देवस्तत्प्रिया गिरिकन्यकेति लिंगपुराणं
वारुणीति प्रचेता वरुणः पाशी समरः वर्हणं तिन देवा वरदश्च वरार्थिनां या
त्वैवरणे प्रोक्तस्तस्मात्स वरुणः स्मृत इति सौरपुराणात् वरुणो भगवान् रुद्रो गौ
रीसर्वार्थदायिनीति लिंगपुराणं ६१ वायवीति यद्यपि वायत्रपित्र्यमस इति

© Dharmartha Trust J&K. Digitized by eGangotri

ता॰म॰
टी॰
१५

15

न्त्ययेनभावेनतथापिसंवेद्यमात्रविवक्षायांप्रौढिकोऽणकार्य्यः बालेन्दुशेखरोवा
युः शिवाशिवमनोरमेति लिङ्गपुराणे ६२ आग्नेयीति अग्नेरिति ढक् अग्नेर्नेयीति
त्यादिनाप्युपादेशः स्वाहावह्न्यात्मनस्तस्यप्रोक्तापञ्चपत्नीसती षण्मुखोभगवान्दे
वोबुधैःपुत्रउदाहृतइति लिङ्गपुराणे जातवेदाःस्वयंरुद्रोस्वाहाशर्वार्द्धकायि।
नीतिलिङ्गपुराणे ६३ नैर्ऋतीति उनैर्ऋती कर्बुरः क्रव्यादितिशब्दार्णवः ६४
दैत्यानीति दशार्थेभ्यर्थ्ये ताच्छील्यवयोवचनेत्यादिनौवानश् टेर्योगेङीष्
तदेवमष्टदिक्पालशक्तिरूपत्वेनव्याख्याने ६५ चेडिकेति चेडशब्दस्यबह्वादित्वा
न्ङीषु संज्ञायांकन्नसीतिनरसिंहपुराणात् ६७ सुमेरुतनयेति मेरुःसुमेरुर्हे
माद्रिरित्यमरः तदेकदेशोत्पन्नत्वात् उक्तंचरुद्रयामले मेरोःपश्चिमकूलेचचो
लनामाह्रदःस्मृतः तत्रयज्ञेस्वयंदेवमातानीलसरस्वती ६८ सर्वेषामुपका
रिणीतिकार्य्यमात्रहेतुतयासर्वसहकारित्वादित्यर्थः ७० वेद्येति वेदितुंयोग्या
ग्यावेद्या अर्हार्थेकृत्यः स्वपकर्षवोधनात्तुकूलव्यापारविशेषेणनतिरितिनैयायिकाः।

६१
१५

© Dharmartha Trust J&K. Digitized by eGangotri

ललजिह्वेति लललौल्ये चतुर्भुजां ललजिह्वामिति फेत्कारिणीतंत्रे ललजिह्वां म
हाभीमामिति तंत्रचूडामणौ ७१ सरोजाक्षीति विशदार्थं फुल्लेंदीवरलोचनामि
तिवचनात् ७२ मुंडस्रजविभूषणेति स्रकशब्दाद्भागुरिमते टापि स्रजोदसस्य तस्येयं तु
त्वं अथवा ङ्याप्योः संज्ञाछंदसोर्बहुलमिति ह्रस्वः मुंडमालाविभूषितामिति फेत्कारिण्यां ७३
सर्वानंदमयीति तत्र हेतुवचने मयट् ईश्वरानंदस्य नित्यतयाऽश्वमेधादिजन्यता
वच्छेदकावांतरजातित्वादेस्त्वानंदविरहेण यद्यपि नानात्वमुपपन्नं तथापि स्वानंदां
तरापेक्षापकर्षराहित्यमेव ब्रह्मानंदतादात्म्यं न विवक्षितत्वात्सर्वैः स्वयुक्तं ७४ सर्वे
ति तन्नास्ति त्रिषु लोकेषु यत्तया तु विना क्वचिदिति महाभारतात् अत्र संज्ञात्वा
भावेन सर्वस्येइति ह्रस्वं ज्ञेयं जगत्प्रपंचस्य ईश्वरोपादानकत्वेन ईश्वराभिन्नतयाव
दातिमतेनेदं नेह नानास्ति किंचन मृत्योः समृत्युमाप्नोति य इह नानेव पश्यती
ति श्रुतेः यद्वा षर्व हिंसायामिति धातोः सर्वेति हि नास्ति सर्वा रुद्ररूपत्वादित्यर्थः ७५
सर्वानंदस्वरूपिणीति पूर्वोक्तश्रुत्यत्वात् शर्वः शिव इति अमरव्याख्यातारः तदानंद

© Dharmartha Trust J&K. Digitized by eGangotri

त्म॰
टी॰
१६

स्वरूपयति स्वरूपभागं करोति निजं नयतीति यावत् यद्वाश्रमभेदोपचारेणतादृप्योक्तिः दत्तिरिति दत्तिर्गुरुत्ववत्तोपि ब्रह्मांडस्य पतनाभावः तस्य तन्न प्रतिरोधक यत्नाश्रय इति यावत् धृतिर्धारणधैर्ययोरिति विश्वः धृतिः पिंडारके तथेति मात्स्ये ७७ मेधे ति धारणसमर्थबुद्धिस्वरूपत्वात् मः शिये मारमायोचेति विश्वः तस्मिन् कामे दधाती ति मेधा धातः कः प्रत्ययः कालिकारूपत्वात् महाकालो यविभ्यति नामिति कुलचूडामा णिदर्शनात् ७८ लक्ष्मीरिति तथासिद्धपुरे लक्ष्मीतिमात्स्य पुराणात् विश्वरूद्रांतरे ङ्गेत यत श्रीरुद्रांतरे तथा तन्त्रासिकानामस्त्यानो काव्यशास्त्र विगर्हितमिति का॰ ल्पतरुलिखितवराहपुराणात् ७९ श्रद्धेति फलापर्षभाविनिश्चयः श्रद्धा भक्ति त्व श्रद्धा तेज्ञानत्वाप्यजाति विशेषावित्यपि केचित् एतेन कर्ममोक्षमार्गद्वयोपयोगि त्वमेव श्रद्धयाग्निः समिध्यते श्रद्धया हूयते हविरिति श्रुतेः श्रद्धावित्तो भूत्वा त्मन्ये वात्मानं पश्येदिति श्रुतेश्च ८० पन्नगशायिनीति पंङ्क्षांतगच्छतीति व्युत्पत्त्याष्टषो दरादित्वेकौसयामङ्कलक्षणयायोगार्थे वितो ग्राह्यः शेते श्वासित्यितिमात्रमर्थः जला

७९

१६

© Dharmartha Trust J&K. Digitized by eGangotri

शायइत्यादिवत् तथा च नेत्रचूडामणौ सुभ्रवर्णो महादेवः शवहृद्धिमलासनो यद्वा पन्नगे
शाययति स्वापयति नारायणमिति ण्यन्तात्तृणिनि प्रत्ययः योगनिद्रास्वरूपत्यादिति भा
वः ययात्यया जगत्स्रष्टा जगत्पात्यत्ति यो जगत् सोपि निद्रावशं नीतः कस्तां स्तोतुमि
हेश्वर इति मार्कंडेयोक्तेः ८१ रुक्मिणीति रुक्मिणी द्वारवत्यामिति मत्स्यपुराणम् रु
क्मिण्यभिन्नलक्ष्म्यभिन्नत्वेन रुक्मिण्यभेदः राघवत्वे भवेत्सीता रुक्मिणी कृष्णजन्म
नीति विष्णुपुराणात् ८२ जानकीति जनकस्यापत्यं स्त्री तया चित्रकूटे तथा सीतेति
मत्स्यपुराणात् पूर्वेषां व्याख्यानमेतत् ८३ दुर्गेति दुःखेन गम्यते ज्ञायत इति चंद्रिकायां
दुःखेन गंतुं शक्यते स्यामिति माधवी मार्कंडेयपुराणे तत्रैव च वधिष्यामि दुर्गमाख्यं म
हासुरं दुर्गा देवीति विख्यातं तन्मे नाम भविष्यति काशीखंडेपि अद्यप्रभृति मे नाम दुर्गे
ति ख्यातिमेष्यति दुर्गदैत्यस्य समरे पातनादतिदुर्गमात् दुर्गमेत्यपि दुर्गस्यैव नामांतरं
तस्मिन्निमग्नांल्लोकान्मामेमार्गेणे दुर्गमासुर इति ८४ सत्येति अबाध्यस्वरूपेत्यर्थः॥ वेदांत
मतेस्सत्ताया ब्रह्ममात्रधर्मत्वात् तत एव घटादिसत्ताव्यवहारात् अस्ति भाति प्रियं रूपं ना

© Dharmartha Trust J&K. Digitized by eGangotri

ता॰स॰
टी॰
१८

सर्वेत्यपशापर्वकं आर्यंत्रयं ब्रह्मरूपं जगद्रूपं ततो ऽद्वयमित्युक्तेः ८५ सत्यवतीति सत्यं
नित्यं ज्ञानं यादिकं अस्त्यस्याः इति मतुप् ८६ रतिरिति रतिः स्मरस्त्रियां प्रोक्तेति विश्वः
पीठशक्तिविशेषरूपत्वाद्वा रतिः प्रीतिस्तथैव चेति सिद्धसारस्वतात् ८७ कामा
द्रेति पर्वतविशेषस्यत्वात् कामाद्रिश्चित्रकूटश्चेति विश्वयमेदिनीकरात् अत एवाने
कशक्तिसहिता कामाद्रौ पूजयाम्यहमिति कुमारीपूजायां मंत्रवर्णः कुलचूडा
मणौ तस्माद्रत्नगुणं प्रोक्तं कामाद्रौ योनिमंडले तस्य फलं महादेवि यत्नं किं कथ्य
ते प्रिये ८८ मोक्षदेति अपुनर्निवृत्तिर्मोक्ष इति सर्वमतपरमार्थः तदुक्तं किरणा
वल्यां नहि मुक्तस्य दुःखं पत्याय यतः तत कश्चिदभ्युपैतीति कूर्मपुराणे तस्मा
द्विमुक्तिमन्विच्छन् पार्वतीं परमेश्वरीं आश्रयेत्सर्वभूतानामात्मभूतां परां शिवां
रुद्रयामले ब्राह्मणो मुक्तिमाप्नोति मंत्रस्यास्य प्रसादतः ८९ अनंतेति कूर्मपु
राणात् अस्यास्त्वनादिसंसिद्धमैश्वर्यमतुलं महत् तत्संबंधादनंतैषा रुद्रेण
परमात्मनेति ९० नारसिंहीति नृसिंहशक्तिरूपत्वात् विदितं यत्नीसटा मातेत्रा

१८

17

© Dharmartha Trust J&K. Digitized by eGangotri

हतनक्षत्रतारकाः नखिनीहृदयाजातानारसिंहीसुदारुणेति वामनपुराणोक्तेः ९१
सरस्वतीति सरस्वतीनदीभेदेश्रीवाग्देवतयोर्गिरीति विश्वः ९२ महादेवरतेति मा
तिव्रत्येनतदासक्तत्वात् ९३ चंडीति चंडीकात्यायनीहिंस्राकोपनस्त्रीषु संमतेति
विश्वः ९४ चंडदोर्दंडखंडिनीति चंडस्यदैत्यविशेषस्यबाहुस्तंभौदंडौदृढत्वात् द
ढत्वात्तौखंडयतीतितच्छीला ९५ दीर्घकेशेति सामुद्रिकलक्षणत्वात् ९६ सु
केशीपिंगकेशीतिस्पष्टार्थं ९७।९८ महत्कचेतिबंधादसंख्याततामावः ९९ भवानीति
भवत्यस्मात्सर्वमितिभवः तस्यस्त्रीभवानीपुंयोगादितिङीप् इंद्रवरुणेत्यादिनानुगा
गमः स्थानेश्वरेभवानीतिमत्स्यपुराणे १०० वाक्यप्रमाणपदसागरपारगस्यलक्ष्मीध
राभिधपुरुषस्यतनूद्भवेन विश्वेश्वरेणविहितेगिरिजाभिधार्थचिंतामणावविहयम
यूषेसमोद्वितीयः प्रतियत्परमाणुसर्वविद्यानिवसंतीत्यपियथार्थनेस्तदानः प्रकटी
भवतीहतेजपेपुष्पवर्णेंदीवरेरणेवागुरूणां ग्रथद्वितीयशतव्याख्या भवपत्नीति
पत्युर्नोयज्ञसंयोगेइतिङीष्यानियागाशिष्टेनकारः पत्नीपाणिगृहीतीस्यादित्यमरः

© Dharmartha Trust J&K. Digitized by eGangotri

अथवा पातीति व्युत्पत्त्या भवस्य जगतः पत्नी रक्षणकर्त्रीत्यर्थः तिरोधत्तामक्षिनौ
दासपत्नी इति भरतस्य विमलबोधादिभिस्तथा व्याख्यानात् १ भवभीतिहरेति
भवः संसारसन्तक प्रियशोककरजन्मसु इति विश्वः भयभीतिभिरिति वार्त्तिकात्समा
सः हरतेरच् प्रत्ययः मोक्षदायिनीत्यर्थः २ शचीति पुलोमजा शचीन्द्राणीत्यमरः
शचश्वचगतौ देवलोके तथैन्द्राणीति मात्स्ये ३ पौरंदरीति वाचंयमपुरंदरौ चेति निपा
तात्साधुः तस्येदमित्यण्ततात् ङीप् तत्पत्न्येत्यर्थः ४ विष्णोर्जायेति विष्लृ व्याप्तौ विषेः
किच्चेत्यौणादिको नुप्रत्ययः वेवेष्टि सर्वं व्याप्नोतीति विष्णुः मात्स्येपि आप्तेत्येव विश्वात्मा
त्रैलोक्यं सचराचरं तस्माद्विष्णुरिति प्रोक्तः स्वयमेव स्वयंभुवा जायायास्तद्धि जायात्वं यद
स्यां जायते पुनरिति मनुः एषैव रक्ता रजसि वैष्णवी परिकीर्त्तितेति वराहपुराणम् ५
माहेश्वरीति महेश्वरशब्दो व्याख्यातः ततोऽण् प्रत्ययः एषैव कृष्णा तमसि रौद्री देवी
प्रकीर्त्तितेति वराहस्मरणात् माहेश्वरी त्रिनेत्रा च वृषारूढा त्रिशूलिनी महाहिवल
यारौद्री जानाकुंडलिनी लक्षणात् इति वामनपुराणे इन्द्राण्यन्वात्माहेश्वरीजातेत्यन्वयः

© Dharmartha Trust J&K. Digitized by eGangotri

परेति सर्वोत्कृष्टेत्यर्थः परशब्दस्य प्रपंचसारादौ त्रिपुराव्यवहारात्सा वा ग्राह्या तत्रा
येसर्वनामतात्परस्यैइतिरूपंचतदर्थो कुतः परस्मिन्पुरुषे रजो वेति मारविस्थु अन्ये
परायैइतिभेदः ७ सर्वेषांजननीति अतिस्पष्टोर्थः सर्वपदंनित्यपदार्थातिरिक्तप
रं ८ नित्येति प्रागभावप्रतियोगित्वेसतिध्वंसाप्रतियोगित्वं नित्यत्वमितार्किकाः
अनेनअन्यनिष्ठकरणतानिरूपितकार्यतानाश्रयत्वेसति अन्यमात्रनिष्ठकार्य्यता
निरूपितकारणताश्रयत्वंउक्तं अन्यथासर्वेषांजननीत्यस्यानुपपत्तेः अथवाल
लिताकामेश्वर्य्यादिषोडशनित्यास्वरूपेत्यर्थः ९ वार्वगीति वारूणीरम्याणिपगानि
यस्याः सोगादितिसूत्रेऽसंयोगोपधादित्यस्यप्रतिप्रसवत्वेनअंगगात्रकंठेभ्यश्चे
ष्यतेइतिवृत्तिकारोक्तेः अनुक्तसमुच्चयार्थचकारेणैतदर्थसंग्रहइतिदन्यास
कारादिव्याख्यानात्ङीष् १० दैत्यनाशिनीति दित्यदितीत्यादिनाऽपत्यार्थे
एयः नाशयतेस्ताच्छील्येणिनिः इत्थंयदायदाबाधादानवोत्थाभविष्यति
तदातदावतीर्य्याहंकरिष्याम्यरिसंक्षयमिति मार्कंडेयपुराणात् अथवादैत्याः

© Dharmartha Trust J&K. Digitized by eGangotri

त॰स॰
टी॰
१९

स्वर्गादयः मोक्षदत्वात्तन्नाशिनीत्यर्थः असुर्यानामतेलोकाअंधेनतमसावृताइति ईशावास्यभाष्येआचार्यैस्तथाव्याख्यानात् ११ घोररूपेति घोरंभीमेहरेइतिविश्वः ललजिह्वामहाभीमामिति तंत्रचूडामणिवचनात् शिवस्वरूपेत्यर्थोवा उक्तशक्तिग्राहकत्वात् १२ महेशानीति पुंयोगलक्षणेङीष् महतीचासौईशानीचेतिवा सेवेयः १३ कामिनीति कामयतइतिताछील्येणिनिः कामइच्छाऽस्त्यस्याइतिवा नित्ययोगेइनिः ईश्वरेच्छायानित्यत्वस्वीकारात् १४ वरवर्णिनीति उत्तमावरवर्णिनीतिस्त्रीप्रकरणेअमरः वरोवर्णोस्यास्तीतिस्वामी यद्वावराश्रेष्ठावर्णिनीयस्याः ब्राह्मणत्वात्समासांतः अभेदविवक्षयाकर्मधारयोवा छिन्नमस्तारूपेणवेदडाकिनीवर्णिनीयुक्तोवामदक्षिणयोगात्इतितंत्रोक्तेः १५ महाविद्येति महतीनित्याविद्याज्ञानंयस्याः नित्यज्ञानवतीतियावत् १६ महामायेति महतीअवच्छेदकभेदेनबहुविधामायाअविद्याअनादिरनिर्वचनीयावेदांतप्रसिद्धायस्याः आश्रयत्वविषयत्वभागिनी निर्विभागचितिरेवकेवलमितिवेदांतिवचनाद्ब्रह्मणोऽविद्याश्रयत्वात्

१९

तद्रूपेत्यर्थः अविद्यायाएकत्वेपिउपाधिभेदान्नानात्वस्वीकारात् इंद्रोमायाभिःपुरु
रूपईयतेइत्यादिश्रुतेः अथवाअमांदर्शानिधियियादितिस्वमंत्रसायनायारत्यसंवं·
धेनप्राप्नोति अमायाकप्रत्ययेरूपं महतीवासौमावेतिकर्मधारयः तस्यांविशि
ष्टपूजनविधानात् यद्वानविद्यतेमायाविपरीतज्ञानसंशयज्ञानाभावरूपा
यत्रतथा महच्छब्देनकर्मधारयः भ्रमसंशयाभावत्वेसतिसर्वज्ञानाश्रयःइत्य
र्थः तत्रचत्रिविधोमोहः संभवःसर्वपाप्मनां अज्ञानेसंशयज्ञानंमिथ्याज्ञान
मितित्रिकंइतिस्मृतेः अथवामहतीसर्वविषयकत्वनित्यत्वाभयधर्मयुक्तामा
ज्ञानेतांयातीत्यर्थः यद्वा महतीमालक्ष्मीःतांयातिसर्वस्वेषणनइतिश्रुतेः ९७
महामेधेति धीर्द्धारणावतीमेधेत्यमरः अथवामहतीमेधायस्याइतिपंचम्यर्थेव
हुव्रीहिः यस्यकाषणाद्भक्तानांमहाबुद्धिलाभोभवतीत्यर्थः अव्याहतमतिः शा
न्तेइत्यादिप्रागुक्तयामन्त्रादिवचनात् अथवामहान्मेधोहिंसायस्याः मेधतेर्हिं·
सार्थाः कल्पद्रुमादावुक्ताः ततोभावेघञ्वालिप्रियत्वादित्यर्थः तथाचचंडिकोव

© Dharmartha Trust J&K. Digitized by eGangotri

लिदानेननीषयेत्साधकः सुधीरिति कालिकापुराणे १८ महोत्सवेति उत्सः प्रसव
णेवारिप्रयाहोनिर्झरोऽस्त्ररइत्यमरः महांतेउत्सवातिगर्व्हेतीवागातिगेयनयोरस्मात्
कः नदीतीरेनगोपांतेइतिकृत्यासाधनस्थानोक्तेः १९ विरूपेति विकृतंरूपंयस्या
भीषणत्वात् विशिष्टंवासर्वोत्कृष्टत्वात् विगतंरूपंयस्याःब्रह्मरूपत्वादितिवा ए
तद्वैतदक्षरंगार्गिब्राह्मणानभिवदन्त्यस्थूलमनणवह्रस्वमित्यादिश्रुतेः २० वि
श्वरूपेति नडक्रमात्स्य सर्वदासर्वभूतेषुद्रष्टव्यासर्वतोमवि सर्वभूतेषुयत्किंचि
द्दृहितेनमयाविना २१ मृडानीति मृडयतेः सुखार्थात्पचाद्यच् ततोङीषुद्रवोस्मिवि
हणेत्यादिनाआनुक आर्याविकामृडानीतिहलायुधः २२ मृडवल्लभेति दयिते
वल्लभेप्रियमित्यमरः वल्लेतिसौत्रःप्रीत्यर्थइतिस्वामी यद्वाभावेकप्रत्ययान्मृडंसु
खजनकत्वसंबंधेननद्दतीलभाभक्त्यादिरूपाप्राप्तिर्यस्याः दुलभष्प्राप्तौ षड्भिदा
दिभ्यइत्यङ् २३ कामरूपेति कामेनस्वेच्छयात्तरूपंयस्याः अष्टसिद्धियुक्तत्वात् शरीरसा
पेक्षकर्माणि सृष्ट्यादौशरीरपरिग्रहाद्वा शरीरसापेक्षकर्माणिशरीरस्यापिग्रहणादिक्ष

© Dharmartha Trust J&K. Digitized by eGangotri

दयनाचार्यैरुक्तत्वात् उक्तं च भगवद्गीतायां यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहं कामरूपाख्यंपीठं अस्य स्यादित्यर्थः श्रीआदिना
दत्वा तथा च मुंडमालायां कृते जालंधरे पीठं त्रेतायां पूर्णपर्वते उड्डियाने द्वापरे तु
कामरूपे कलौ युगे महाफलप्रदे लोके नास्ति पुण्यस्थितिरिदं महत् पंचाशत्पीठमध्ये
तु कामरूपं महाफलं जपपूजाबलिस्तोत्रादि विलक्षगुण्णं भवेत् बहुधा कथ्यते दे
वि किं तस्य गुणवर्णने योनिरूपेण यत्रास्ते स्वयं कोटिगुणात्मिकेति समयाचारे
चत्वारः पीठानि सुभगे शक्तिदेहे ध्रुवाणि च तानि चत्वारि वक्ष्यामि गुह्याद्गुह्यतराणि
च शक्तेः सर्वशरीरे स्यात्पीठं पूर्णगिरं मतं तस्याः शिरसि सुभगे उड्याणं कीर्तितम
या स्तनौ जालंधरं ज्ञेयं कामपीठं भगं स्मृतमिति अथवा कामरूपस्य दर्शनमात्रतः
इत्यादि कुलचूडामणिदर्शनाच्च २४ महेशानीति महत्पूजायां महाध्वजकाहल
क्ष्मीसमाहारेन्द्रीहितः महत्प्रातेन ...... महेशंश्चानयति जीवपतिमहेशानी
कर्मण्यपतनात्ङीष् भक्तानां सम्प[illegible]हेतुत्वात् २५ नित्योत्साहेति भक्तानामिष्टार्थ

© Dharmartha Trust J&K. Digitized by eGangotri

त.स.
टी.
२१

दानेषु नित्यउत्साहोऽस्याः सर्वदानदासक्तेत्यर्थः यद्वा ईश्वरप्रयत्नस्य नित्यत्वात् उत्साह
पदेन यत्नाभिधानात् प्रकृतिरूपत्वाद्वा २६ मनस्विनीति भूमनिंदाप्रशंसास्विति वा
र्तिकात् प्रशस्तं मनोऽस्याः शीघ्रप्रसादत्वादित्यर्थः अत एव मात्स्य तां प्रति जगति
काप्रणनामिमतं ददौ ऊढतिसिद्धगुते भवती यथेति वीरोक्तिः क्षिप्रप्रसादा जगतां
सदा नीलसरस्वतीति वचनाच्च २७ वैकुंठनाथयत्नीति वैकुंठशब्देन भागवतादौ
वैष्णवलोकार्थं प्रसिद्धः स्पष्टमन्यत् २८ शंकरवल्लभेति पदद्वयं व्याख्यातं २९ कोटि
चंद्रप्रतीकाशेति कोटिचंद्रा इति समासः विंशत्याद्याः सदैकत्वे इत्यमरः प्रतीकाशे
ति उपसर्गस्य घञीति दीर्घः सदृशार्थश्चायं प्रतीकाशोपमादय इति दंडाचार्योक्तेः
सूर्यकोटिप्रतीकाशं चंद्रकोटिसुशीतलामिति नीलतंत्रे ३० घ्रातसूर्यसमप्रभे
ति सूर्यशब्दो राजसूयेत्यादिना निपातनात्साधुः उभयत्र कोटिशतशब्दे योर्बहु
त्वमात्रे तात्पर्यं यद्वा शतं बहवः सूरयः पंडितास्तेषां प्रसादेन मकत्राग्रस्तेन यवाप्
य् तादृशी मा ज्ञानं यस्याः इति पंचम्यर्थे बहुव्रीहिः ततः घ्रातसूर्यसमा प्रकृष्टा भा जातं

21

© Dharmartha Trust J&K. Digitized by eGangotri

यस्याः इति विषयत्वार्थे कषष्ठ्यर्थे बहुव्रीहिः बहुपंडितनिरस्कारहेतुज्ञानजनकभक्ति
विषयमस्तीत्यर्थः ज्ञानस्य भक्तिनिष्ठत्वानर्थलभ्यं २१ जह्नुकन्येति जह्नोर्ऋषेर्भेदकैस्य
न्या तथा तेन स्वीकृतत्वात् स्कंदमविष्णोन्तरयोः यथा गौरी तथा गंगा तस्माद्देव्यास्तु
पूजने यो विधिर्विहितः सम्यक्सोपि गंगाप्रपूजने तेनैव पुराणे विष्णुरुद्रान्तरं चैव
श्रीगौर्योरंतरं तथा गंगागौर्यन्तरं चैव यो ब्रूते मूढधीस्तु सः २२ मनोज्ञेति मनोज्ञं
मन्जुलमित्यमरः अथवा आत्मरूपत्वात् मन एव ज्ञं यस्याः इत्यर्थः मनसैवानुद्रष्टव्य
मिति श्रुतेः २३ पार्वतीति पर्वास्यास्तीति पर्वतः पर्वमरुद्भ्यामिति तकारः पर्वतस्या
वपर्वतादिति मान्तस्य तस्यापत्यमित्यण् पार्वती शिवसन्निधाविति मान्तस्य २४ हरव
ल्लभेति स्पष्टं २५ काश्यपीति द्रोणिर्ज्या काश्यपी दितिरित्यमरः भारते दानधर्मे
एवं वर्षसहस्राणि दिव्यानि विपुलव्रतः त्रिंशतः कश्यपो राजन्भूमिरासीदनंदि
तः अथागत्य महाराज नमस्कृत्य च कश्यपं पृथिवी काश्यपी जज्ञे सुता तस्य महा
त्मनः भार्गवेण यज्ञाने कश्यपाय प्रतिपादितत्वात् इति स्वाम्यादयः आयारम्भ

© Dharmartha Trust J&K. Digitized by eGangotri

त.स.
टी.
२२

ताजगतस्त्वमेकामहीस्वरूपेणायतस्थितासि इतिमार्कंडेयोक्तेः अथवामूलाधा
रास्थितत्वादेतत् महीमूलाधारे इत्याचार्यभणनात् अथवा काश्यपिः सूर्यः त
स्येयमितिप्रत्यक्षलक्षणः संबंधः श्रीविद्यामंत्रेचैतत् तथावर्णार्णवे लो
पामुद्राख्यविद्यायाद्वितीयायाः महेश्वरि कामराजेभृगुर्हित्वातार्त्तीयेसकगाः शिवः
एषाविद्याचवारोहे त्रिपुरासूर्यपूजिता अथवा कश्यपः स्यान्मुनौमीनभेदे इतिविश्वः
सोस्त्यस्यावाललेनेतितथा उक्तंचकालिकापुराणे मत्स्याः स्वगात्ररुधिरेर्वडिकाव
लयोमताइति यद्वाकश्यपस्येयंजनकत्वसंबंधेनेत्यर्थः मरीचिर्भगवान्रुद्रः संभूति
र्वल्लभाविभोइतिलिंगपुराणोक्तेः २६ कमलेतिअशेषआद्यजंतंश्रीगौर्योवितन्वंत्यति
उक्तवचनात् अथवापद्मावतीरूपत्वात् पद्मासनस्थांकरपंकजाभ्यांरक्तोत्पलेसंदध
तीत्रिनेत्राइतिध्यानात् अथवाकमलस्वरूपावद्धजूटत्वात् नीलोत्पलललसन्मालावद्धज
टाभयेकरीमितितंत्रचूडामणिवचनात् २७ कृत्स्नेति सर्वव्यापिनीत्यर्थः नत
यारहितंकिंचिद्ब्रह्मांडेऽस्मिन्सचराचरे इतिमात्स्येदत्तोक्तेः अथवाकृत्स्नइतिप्रत्यपवि

22

२२

© Dharmartha Trust J&K. Digitized by eGangotri

शेषसंज्ञा कर्त्तरिकृदितिपाणिनिस्मृतत्वात् तेषांमताशैवंमाशौचेषुजर्थेभावेकाशसेता
स्यस्याः कृत्स्नाअशेषआदित्वादच् अथवाकाशकृत्स्नोमुनिविशेषः इंद्रश्चंद्रः काशकृ
त्स्नापिशलीशाकटायनः पाणिन्यमरजैनेंद्राजयंत्यष्टादिशाब्दिकाइतिवोपदेवः अ
स्मीमेत्यादिवदेकदेशप्रयोगः तत्सदृशंकरोतीतिकृत्स्नामाकरणशानहेतुरित्यु
भयार्थः यद्वा जीवब्रह्मणोरभेदज्ञानहेतुरित्यर्थः तथाचवेदांतसूत्रे अवस्थितेरि
तिकाशकृत्स्नइति अनेनजीवेनात्मनानुप्रविश्येति जीवब्रह्मणोरत्यंतमभेदात्
आत्मनस्तुकामायसर्वंप्रियंभवतीतिजीवलिंगमविरुद्धमितिकाशकृत्स्नावायो
वदतीत्यर्थः ३९ कंजपत्रायतेक्षणेति कमितिजलार्थेनिपातः तत्रजातत्वात्कंजंपद्मं
तस्यपत्रपदायतानिदीर्घाणिईक्षणानियस्याः वाचकलुप्तोपमेयमितिज्ञेयं यद्वा
कमलपत्रवदायतेसजातीयोत्तरसंवलितेईक्षणेयस्याः तथाचश्रुतिः तदैक्षत
बहुस्यांप्रजायेयेति तत्तेजोसृजततत्तेजऐक्षतबहुस्यांप्रजायेयेति तदपोसृजततत्था
पऐक्षंतबहुस्यांप्रजायेमहीति ताअन्नमसृजंतेत्यादि अत्रपदमत्रपृथिवीपरम्

© Dharmartha Trust J&K. Digitized by eGangotri

23

ईक्षणेमायाहन्तिविशेषः ईक्षणेनराणांयथानैवेयर्थ्यंतथावेदान्तग्रंथेषुस्पष्टं ३९
रोमकोब्रह्माअकारोविष्णुः हकारःशिवः मःशिवश्चेद्रमावेधा अकारोवासुदेवः
स्यात् हस्तथापद्मालिनिकीर्त्तितइतिनानार्थयुनिमंजरी एतेषामीश्वरीत्वधि
ष्ठातृत्वादितिभावः ४० वृषारूढेति शिवस्यार्द्धांगासक्तत्वात् माहेश्वरीवृषारूढा
त्रिशूलवरधारिणी महाहिवलयाप्राप्ताचंद्ररेखाविभूषणेतिमार्कंडेयात् अ
थवा वृषःशब्दब्रह्मतदारूढात्तदेकगम्यत्वादित्यर्थः त्रियावृद्धोवृषभोरोरवी
तीति प्रक्रम्य वृषभोवर्षणादितिभाष्यात् ४१ पूर्णचंद्रनिभाननेति पूर्णचंद्रे
णतुल्यंपूर्णचंद्रनिभं अस्वपदविग्रहोनित्यसमासत्वात्ततोबहुव्रीहिः ४२ मान्ये
ति सर्वैःसम्माननार्हत्वात् अर्हार्थेकृत्यः ४३ मानवतीति ईर्ष्याप्रणयादिकमा
नभेदवतीत्यर्थः सर्वस्त्रीस्वरूपत्वाद्वा अनवच्छिन्नपरिमाणवत्वाद्वा ४४ ध
न्येति धनंगणंलब्धेतियावत् धन्यःपुण्यवतिस्मृतइतिविश्वः ४५ हिमगिरेःकन्ये
ति हिमप्रधानत्वात्हिमगिरिस्तस्येष्टमन्यत् ४६ अपर्णेति तपस्यमानतयापर्ण

© Dharmartha Trust J&K. Digitized by eGangotri

नामयित्वागादिति पुराणवार्त्तोऽत्रतपवक्तुमारसंभवे यिभाणितं स्वयंविशीर्णद्रुमप
र्णहत्तितापराहिकाष्ठा तपोऽस्तयापुनः ततप्प्याकीर्णमतंप्रियंवदां वदन्त्यपर्णामिति तां २ताप:
पुराविदः अथवा तङ्गिनी ग्राह्या तथा च मात्स्ये मेना तु सुषुवे तिस्रः कन्या योग
वतीशुभाः उमैकपर्णापर्णा च तीव्रव्रतपरायणाः हृदस्यैकाहितस्यैका जैगीषव्य
स्य चापरा दत्ता हिमवता बालाः सर्वलोकतपोधिकाः अथवा अपगतं नष्टं ऋणं त्रिवि
धं यस्य सो ऽपर्णः जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवान् जायते यज्ञेन देवेभ्यः स्वाध्याये
न ऋषिभ्यः स्वधया पितृभ्य इति श्रुतेः तादृशं करोतीति णिजंतात् स्वार्थाय च् यद्वा अपग
तं ऋणं यस्या इति पंचम्या बहुव्रीहिः ऋणत्रयापाकरणहेतुः तदुपायसंपादनद्वारे
तिभावः अनेनैतत्सेवाया आवश्यकत्वं सूच्यते ब्राह्मणस्य तु सोमविद्याप्रजमृणवाक्ये
न संयोगादिति षाष्ठाधिकरणन्यायेन तस्य नित्यत्वावगमात् ४७ पद्मपत्राद्यीति अस्य
ष्टार्थं यमेवाचकत्वं सोयमासमागतेति विशेषो ग्राह्यः यद्वा शतपत्रेति प्रसिद्धानु
रोधेन पद्मपत्रपदस्य शतपत्रतयापद्मनाक्षीत्यर्थः ततः प्रातेन नेत्राणां निरीक्षिणा

© Dharmartha Trust J&K. Digitized by eGangotri

न॰स॰
टी॰
२४

४८

मियन्मुनीन् कौरत्नेयिषोतिमनुजाः पातालीमितिमातन्तनइतिमार्कण्डेयपुराणात्
नागयज्ञोपवीतिनीति नागशब्देनकर्कोटकग्रहणं सामान्यस्यविशेषपर्यवसा
ननियमात् तथैव कर्कोटककृतोपवीतिकामित्युपनिषद्दर्शनात् प्रोक्तेनेदक्षिणे
पाणावुपवीत्युच्यतेद्विजइतिमनुः नागएवयज्ञोपवीतंइतिकर्मधारयादितिप्रस
यः यद्वानागेनयज्ञोपवीतिनीतिसमासः नागमियंयथायज्ञोपवीतंतद्वतीत्यर्थः

४९

24

महाशङ्खधरेति द्वावेवानिम्यन्तरेकेवुललाटास्थिसत्वीषुचेनिविष्टः नेत्रान्तर
मपि शिरोनेत्रान्तरस्यास्थिमहाशङ्खःप्रकीर्तितेति तद्धारणेवकपालहस्तत्वात्
एतन्मन्त्रजपेतन्मालाविधानाद्वा महाशङ्खमयीमालाज्ञेयानीलसरस्वतीतिते
त्रोक्तेः ५० कान्तेति कान्तंमनोरमंरुच्यमित्यमरः यद्वा कोब्रह्माहम्निलार्केषु
शामनेसर्वनाम्निच पावकेचमयूरेचमस्तवशीर्षजलेषुके इतिविश्वः ब्रह्मादिरत्न
त्वङ्गर्भयस्याः अन्तशब्दोस्वरूपार्थोवीतिस्पष्टंभाष्ये ५१ कमनीयेति कमुकान्तौ
अस्मादनीयररम्येत्यर्थः सर्वेषामिच्छाविषयीभूतेतिवा ५२ वगान्मजेति न

२४

© Dharmartha Trust J&K. Digitized by eGangotri

गशाहेनआरानयादितिनञ्कत्वाशेषस्याहे ५३ ब्रह्मणीति निनेदत्वात्स्मृतोद्भवाः ब्रह्मा
णीसुखतोभवत् हंसयुक्तविमानस्यासादात्सूत्रकमंडलुभृतिवामनपुराणात् यद्वा
ब्रह्मवेदस्त्राणतिवदतिब्रह्मणिकर्मण्यण् नैयायिकमतेवेदानामीश्वरकर्तृत्वात् न
स्माद्यज्ञात्सर्वहुतऋचःसामानियज्ञिरे इतिश्रुतेः एवंअरे ऽस्यमहतोभूतस्यनिःश्व
सितमेतद्यदृग्वेदोयजुर्वेदः सामवेदो ऽथर्वांगिरसइत्यादिश्रुतेश्च ऋद्धवहणेत्यादिसूत्रे
लाघवार्थं अनेकेषवविधेयत्रानुग्वचनं अन्यत्रापितद्विधानार्थमितिहरदत्ताद
यः ब्रह्माणंआनयतिजीवतीतिकर्मण्यणि पूर्वपदात्संज्ञायामितिणत्वं वेदरूपमिति
दीक्षिताः ५४ वैष्णवीतिपरमात्मायथादेवयकएवत्रिधाभवत् प्रयोजनवशाद्देवीएव
मेषात्रिधाभवदितिवराहपुराणात् बाहुभ्यांगरुडारूढाशंखचक्रगदासिनी
शार्ङ्गबाणधराजातावैष्णवीशक्तिरद्भुतेतिवामनपुराणात् ५५ शोभाजीयेति
शोभासुखंभवत्यस्मादितिशंभुरितिकेचित् माधवस्यपादानेडुप्रत्ययविधानादि
दंचिंत्यं किंतुसुखद्यपोजीवतीत्यर्थः यद्वाणिजर्थमंतर्भाव्यसुखंभावयतीत्यर्थः

© Dharmartha Trust J&K. Digitized by eGangotri

गं॰स॰
टी॰
२५

25

प्रशमयतीति शोद्वृत्ता मेर्यनादन्ते भ्यो यितृ प्रपतत इति विट् गंगा गणं प्रशमयित्री भवतीत्य
र्थः भिषक्तमं त्वा भिषजां शृणोमि अथर्ववेदे अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् इत्यादि
श्रवणादित्याह शिष्टैर्व्याख्याते ५६ गंगाजलेश्वरीति गं गमिति गच्छतीति गंगा अगं गच्छ
तीति वा ति स्वामी तस्याः सायनस्थानत्वादित्यर्थः तथा च वीरतंत्रे शून्यागारे श्मशाने या
दि जपति जडस्ते कालिंगे तडागे गंगागर्भे गिरौ वा शुचिरमलमतिः सर्वदा भक्तियुक्तः
विद्यां श्रीनीलवाण्याः भुवनजनपतिः सर्वशास्त्रार्थवेत्ता देहान्ते योगिमुख्यः परमसु
खपदं ब्रह्मनिर्वाणमेति ५७ भागीरथीति भगीरथेन राज्ञा कन्यासेन स्वीकृत
तात् अथवा भाग्यवुद्धि भीनामिति शुत्पत्तेः गीर्वाणीशब्द रूपा तेरथे देहे येषां ते भागीर
थ्याः फलितार्थकथनेनैव तत् तडभयसुंको रथो देहे येषामिति समासः तेन रथस्य
पूर्वनिपाताप्रसिद्धं शंकानवकाशः अवच्छेदकसंबंधेनैतज्ज्ञानशब्दयोरपि शरीरत्वेन
तात् तेषामियं सेवत्यसंबंधेतीति अण्प्रत्यये रूपं एतेन एतद्यासकानां वादिवि
जयसामर्थ्यं योतितं ५८ मनइति बुद्धिकर्मेन्द्रियसहकारित्वादित्यर्थः तथा च सांख्याः

२५

© Dharmartha Trust J&K. Digitized by eGangotri

उभयात्मकमत्र मनः संकल्पकमिंद्रियं च साधर्म्यादिति मनो महान्मतिर्ब्रह्मा बुद्धिः
पूः ख्यातिरीश्वरः प्रज्ञा चितिः स्मृतिः संविद्विपुरश्चेति स्मृतः मन्यते सर्वभूतानां
यस्माच्चेष्टाफलं ततः सौक्ष्म्यात्तेन विभक्तं तु येन तन्मन इति लिंगपुराणात् मनोह
त्रिप्रयोजकत्वाद्वा मनसोयमनोविदुरिति श्रुतेः ५९ बुद्धिरिति महत्तत्त्वरूपेत्यर्थः
अत्र सांख्याः सांतःकरणा बुद्धिः सर्वं विषयमवगाहते यस्मात् तस्मात्त्रिविधं करा
णं द्वारि द्वाराणि शेषाणि एते प्रदीपकल्पाः परस्परविलक्षणाः गुणविशेषाः कृ
त्स्नं पुरुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छंति तन्मते कार्यस्य कारणमिलत्वाद्बुद्धितत्त्व
जनकप्रकृतिरूपत्वाद्वा पुंस्यंते पुरुषार्थं सर्वान्भावान्हितास्तथा यस्माद्बोध
यते चैव बुद्धिस्तेन निरुच्यत इति लिंगपुराणाद्वा ६० नित्यानंदमवीति यागा
दिजन्यसुखस्यान्येषामपि सत्वात् नित्येति यन्मते आनंद एवात्मा तेषां स्वरूपे य
न्मते तत्तयोर्भेदस्तेषां प्रादुर्भावो मयट् ६१ हरप्रियेति स्पष्टं हकार रकारो भय
यदि इनमंत्रत्वाद्वा ६२ गिरिसुतेति अद्रिगोत्रगिरिग्रावाचलसमरः अथवा गिरिरिति॥

© Dharmartha Trust J&K. Digitized by eGangotri

26

गीः शब्दस्य सम्यक्वचने रूपे तत्रसुताजननीईश्वरीवा शुभसवैश्वर्ययोरित्यनुस्मारा
त् हलदन्तादितिविभक्तेरलुक् पृथक्पदेवा [illegible] हरपत्नीति हरतिहरापत्नीरसिका
वेतिकर्मधारयः पूर्वोकारीत्यापत्नीशब्दस्यवत्वकार्यंकृते ९७ तपस्विनीति तपःसह
स्राभ्यामितिविनिः ऋत्रेभ्यइतिङीप् व्रतोपवासनियमःशरीरोत्तापनेनतपः इतिदे
वलः इदंचशिवप्राप्त्यर्थमवधेयं यद्वातपः कृच्छ्रकार्यो इन्नीन्द्राणाविशेषः तदेवस्तव
इत्यामितिक्रतेः यस्यजानमयेतपइतिश्रुतेश्च ९९ महाव्याधिहरेति तेचोक्ताग्रंथां
तरे वातव्याध्यश्मरीकुष्ठमेहोदरभगंदराः अर्शांसिग्रहणीत्यष्टौमहारोगाः सुदा
रुणाइति ९८ देवीति दीव्यतीतिपचादौदेवट्इतिपाठात् ङीप् ईश्वरस्यरूपेत्यर्थः
नदेवः पुंडरीकाक्षोनचदेवस्त्रिलोचनः अन्नादिनियनेकिंचिदेवतंदेवउच्यते इत्युक्तेः
शुंभासुरनिषूदनीति शुंभासुरेतिविशेषणसमासः तंनिषूदयतिहंतितथा
नितरांइत्यनेनएकवीरंहतस्यजन्मांतरेपितत्त्वज्ञते वैवस्वतेंतरेप्राप्तेत्यारभ्य
विंध्याचलनिवासिनीतिमार्कंडेयपुराणात् ९८ महापुण्यप्रदेति स्याद्रमंमस्ति

© Dharmartha Trust J&K. Digitized by eGangotri

यांपुण्यश्रेयसीसकलंतेहृषडस्यमरः कृत्ज्ञादिनापुण्यावहत्वादित्यर्थः तथाचभविष्यपु
राणे अग्निहीनादिकर्माणिदेवयज्ञाः सदक्षिणाः चंडिकाभ्यर्चनस्यैतेकोट्यंशेनापि
नोसमाः तथा दुर्गार्चनरतोनित्यंमहापातकसंभवैः दोषैर्नलिप्यतेवीरपद्मपत्रमि·
वांभसा छिन्नामित्याचभूतानिहत्वासर्वमिदंजगत् प्रणम्यशिरसादेवींसर्वपापैःप्र
मुच्यते ६९ भीमेति भीमादेवीहिमाद्रौस्थितिमात्स्ये मार्कंडेयपुराणेपि पुनश्चाहंयदा
भीमरूपेणकृत्वाहिमाचले रक्षांसिक्षपयिष्यामिमुनीनांत्राणात् तदामांमुनयः सर्वे·
स्तोष्यंत्यानम्रमूर्तयः भीमादेवीतिविख्यातंतन्मेनामभविष्यति ७० मधुकैटभ
नाशिनीति एतद्व्याख्याहरिवंशात् एकंमृदुतरंमेनेकठिनंवेदवापरं नाममनीषता।
योऽस्वकेसविभुःकमलोद्भवः मृदुस्तयंमधुर्नामकठिनः कैटभोऽभवत् अत्रतन्मो
हनादिद्वारानाशकत्वंबोध्यं प्राणवियोगस्यविष्णुनाकृतत्वात् अतएवमधुकै
टभनाशंचमहिषासुरघातनंइत्यादिमार्कंडेयेतत्प्रभावमध्येगणिते ७१ शांखिनीति
वैसवीरूपेशंखंदत्तेयं अथवा पंचकपालमद्धान्वितत्वात् अथवास्त्रीभेदरूपत्वात् तथा

© Dharmartha Trust J&K. Digitized by eGangotri

न॰ र॰
टी॰
२७

वज्राजार्णवे जातिभेदस्वरूपं नीलांबरतंत्रे वीरवंदिते हस्तिनी शंखिनी पद्मा इति प्रका
रं मध्यमा प्रोक्ता शंखिनी भवेत् शंखिनी तु तथा भद्रे विशुद्धा पापवर्जिता सर्वदेवप्रिया सा
हि शांतसौरभ्यशोभिता कामशास्त्रमपि पद्मिनीतं दत्तचित्रिणीतनः पुंशंखिनीत
दनु हस्तिनी विदुः उत्तमा प्रथमभाषिता ततो हीयते पुनरेव तरोत्तरं ७२ चक्रिणी
ति तथा च महिषमर्दिनीध्याने मात्स्यं त्रिशूलं दक्षिणे दधानं खड्गं चक्रं तथैव च
ग्रथ वा चक्री व्यालः सरीसृप इत्यमरः कुंडलिनी स्वरूपेति यावत् तथा च शारदा
तिलके तत्र विद्युल्लताकारा कुंडली परदेवता परिस्फुरति सर्वात्मा सूक्ष्मादि सूक्ष्मजगा
कृतिः ७३ धात्रीति धात्री जनन्यामलकी वसुमत्युपमातृषु इति विश्वः यद्वा धात्र्याः
पुष्पे धात्री पुष्पे जातीप्रभृतयः स्त्रीलिंगा इत्यमरः पत्रे वा ग्राह्यं तत्रियपत्मात् आमल
क्याः तु पत्रेण तुष्टा पुष्पेण पार्वतीति मुंडमालावचनात् ७४ हस्तेन पुस्तक धारि
णीति सरस्वतीरूपत्वात् मुद्रामक्षगुणं सुधाढ्यकलशं विद्यां च हस्तांबुजैर्बिभ्राणां
विशदप्रभां त्रिनयनां वाग्देवतामाश्रये इति शारदातिलकात् पुस्तं च पुस्तके लेख

27

२७

© Dharmartha Trust J&K. Digitized by eGangotri

कर्मविज्ञानयोरपीति विश्वः अथवा बाला त्रिपुरा तद्रूपेण ज्ञेयं तथा च तत्प्रकरणे ज्ञा
नार्णवे वामेन पाणिनैकेन पुस्तकं चापरेण च अभयं च प्रयच्छन्तीः साधकानां वरानने
संपत्प्रदभैरवीरूपेण वा पुस्तकं चाभयं वामे दक्षिणे चाक्षमालिकामिति तत्रैवोक्तेः ७५
चामुंडेति अत्र मार्कंडेयपुराणे यस्माच्चंडं च मुंडं च गृहीत्वा त्वमुपागता चामुंडेति ततो
लोके ख्याता देवी भविष्यसि वराहपुराणे तु देवी तु त्रिशिखेनाजौ तेन दैत्यं समताडयत्
तया च ताडितेनास्य दैत्यस्य शुभलोचने चर्ममुंडं च तत्रास्य पृष्ठगे च वमस्व हः हरोस्तदा
नवैद्र च चर्ममुंडं दत्तं यतः अथ यस्मात् भैरदे वि चामुंडा तेन सा भवत् वामनपुराणे तु
समेत्य सा च ''देवि गृह्णीतां ग्रीवरोत्तमौ ग्रथितौ दैत्यशीर्षाभ्यां नागराजेन वेष्टितौ तौ
च शीर्षौ समादाय चंडा यामूर्द्धि विमृते वचं च प्राह वैनाव च्छक्षाकर्म सुदारुणं शेख
रौ च चंडमुंडाभ्यां यस्माद्धारयसे शुभे तस्माल्लोके न वा ख्याति श्चामुंडेति भविष्यति ७८
चपलेति चपलः पारदे म[illegible]स्ये चोरके प्रस्तरांतरे चपला कमला विद्युत्पुंश्चलीपि
प्पली सुरेति विश्वः अत्र पुंश्चली वा ग्राह्या कुलसुजायामाक्रम्यात् तथा च कुलवृद्धा

© Dharmartha Trust J&K. Digitized by eGangotri

न.स.
टी.
२८

मणो वेश्यानायितकन्यावरजकीयोमिनीतथा विशेषवैदग्ध्ययुता: सर्वापवक्तु लोगना
इति ७७ तेगेति सर्वोत्कृष्टत्यादितिभाव: यद्वाव्यापकतयोर्द्ध्वदेशसंयोगितात् ग्रथ
श्रोर्द्ध्वप्रसृतत्रयस्यैकैकमितिरिक्तते: ७८ मंदेति मंदामंदाकिनीराम्नेत्यादि विश्व:
मंदाभंदेश्वरेनयेतिमान्स्य ७९ दैत्यनिकृंतनीति दैत्यान्निकृंततिछिनतितच्छी
लातथा तत्त्वकृतीछेदनेइत्यस्मास्मिनोनुमानमानुपपत्ति: शेषत्रयादीनामितिशा
प्रत्ययेपरेतछियानात् शास्यत्वमार्वधातकयवविहितत्यात् एानेत्वार्द्धयातक
त्यादितिवेत्सत्य छांदसत्वाडपपत्ते: एतेनयथासौम्यकेनतत्त्वविनिकृतेनेने सर्व:का
ष्र्णापमंविज्ञानंस्यादिति छांदोग्येपनिश्वत्रयोगोव्याख्यात: ८० शांतिरिति शांति:
शमेपिकल्याणेइतिविश्व: कूर्मपुराणे चतश्र:शक्तयोदेव्या:स्वरूपत्वेनसंस्थिता:
अधिष्ठानवशात्तस्या: शृणुध्वंमुनिपुंगवा: शांतिर्विद्याप्रतिष्ठावनिवृत्तिरितिता:
स्मृता: अथवा रोगमृत्युग्रहादीनांविनाश:शांतिरीरितेतितंत्रांतरोक्तलक्षणाषट्
कर्मोत्तावाग्राह्या ८१ निद्रेति स्यात्रिद्राशयनंस्वापइत्यमर: तथाचहरिवंशेकृतोा

© Dharmartha Trust J&K. Digitized by eGangotri

क्तिः निद्रा च सर्वभूतानां मोहिनी वा लयात्तथा ८२ महानिद्रेति संहारकत्वादित्यर्थः
महती चासौ अनिद्रा निद्रारहिता चेति बहुव्रीहिगर्भः कर्मधारयः नित्यज्ञानवत्त्वा
दित्यर्थः ८३ गुह्यनिद्रेति गुह्यं रहस्युपस्थे स्यादिति विश्वः मूलाधारशायिनीत्यर्थः
मूलपद्मे कुंडलिनी यावन्निद्रायिता प्रभो तावत्किंचिन्न सिद्ध्येत यंत्रमंत्रादिकार्चनमिति
गौतमीयोक्तेः ८४ रेणुकेति रेणुकापि हरेणौ स्याद्यमदग्निस्त्रियामपीति विश्वः
यद्वा रेणुः सिंदूरं अर्थात् युक्तं कं शिरो यस्याः तादृशा स्त्रीस्वरूपेत्यर्थः चामरे रवि
बिंबे चेति नीलतंत्रात् रविबिंबपदेन च सिंदूरान्वितललाटव्याख्यानात् एतत्स्थाने द
ष्टुजपं कुर्यादित्यर्थः ८५ कौमारीति कुमारसंबंधिनी शक्तिः कौमारीशक्तिहस्ता च
मयूरवरवाहना योद्धुमभ्याययौ दैत्यान् अंबिका गुहरूपिणीति मार्कंडेयात् स्कंदाख्ये
वह्निकौमारी बर्हिपत्रा सशक्तिनी समभ्रूता वेदे वर्षे योद्धुं सा वाम्बुपायया विति वामन
पुराणाच्च कौमं भौमारी शिवा मारी चंडिकांजनदलये इति विश्वः सैव काले महामा
रीति मार्कंडेये ८६ कुलजेति महावंशोत्पन्नत्वात् अथवा कुलाचारगम्यत्वा

© Dharmartha Trust J&K. Digitized by eGangotri

तज्जोतनं ८७ कुंतीति कुंतीपांडुप्रियापौच शल्लकोगुग्गुलद्रुमेति विश्वः यद्वा कुंतः
मात्मनरक्षंतिपतीति कुजेतादिकापि कुंतीतिरूपं ततः सा चासौ ई लक्ष्मीश्चेति कर्म
धारयः तदाश्रयत्वादित्यर्थः शूलचक्रंदंडशक्तिवज्रचापाभिधारिणीमिति भविष्य
वचनात् ८८ कौलव्रतपरायणेति श्रीएवं च रहस्ये मे समयाचारसंयुतं येन ह्रीमानः
सिद्ध्यतिजपकोटिसहस्रशतैः इति कुलचूडामणिवचनात् ८९ वनदुर्गेति तत्सेवेषिकि
रातादिभिः पूजनात् तथा च हरिवंशे भगवद्वाक्यं वासस्तव महादेवि वनेषूपवनेषु च
शबरैर्बर्बरैश्चैव पुलिंदैश्च सुपूजिता मयूरपिच्छध्वजिनी लोकाननुक्रमसि सर्वशः अथ
वैयत्परिताग्राह्याकैः रातीधनकुसमोज्वलो मयूरातपत्रकेतनिकामिति प्रपंचसारात् ९०
सदाचारेति सत्यशास्त्रधामदाक्षिणत्वेषामाचारोयस्याः कुलाचारस्यैतन्मते विहित
त्वात् तदुक्तं समयाचारे आचारो द्विविधो देवि वामदक्षिणभेदतः पंचमुद्रादिसहि
तो वामाचारः प्रकीर्तितः पंचमुद्रादिरहितो दक्षिणाचारसंज्ञिकः सदानित्यं चारोयस्याः
सर्वत्रगामिनीत्यर्थः ९१ द्रौपदीति द्रुपदोराजविशेषः अपत्यार्थे अण् ९२ द्रुपदात्मजे

29

© Dharmartha Trust J&K. Digitized by eGangotri

ति तथाचकाशीखंडे उमाचिद्यजगद्धात्रीद्रुपदस्यमहीभुजः यजतोवह्निकुंडाव
पाडुश्चक्रेनिसुंदरीति पूर्वेणव्याख्यातं अथवाद्रुपाणांवृन्दाणांपदंस्थानेपर्वतइति
यावत् तस्यकन्यातिभावः ४२ सृष्टिरिति तत्कारितेष्वभेदोपचारात् सेवसृष्टिर्भवत्य
जेतिमार्कंडेयपुराणे सर्गाद्यकालीतेति ४४ सर्गस्यलोकसृष्टेराद्यकालेप्रागभाव
कालेभवात्तत्रविद्यमानत्वात् अनेनास्याः प्रकृतित्वमुक्तं कार्यमात्रस्यतदानी
मभावात् एतेनसर्गाद्यकालेव्यवहारादि प्रवर्तकत्वेनतत्रप्रमाणमुपन्यस्तं
समानकालीनेत्यादिवत्स्वः यद्वाअक्षेतिषेवादेः सहितासर्गाद्या केसर्वेषांआली
नातन्मयत्वात सर्गाद्यावासौकालीनावेत्तिकर्मधारयः ४५ निशुंभप्राणनाशिनी
ति निशुंभप्राणनाशिनीति निशुंभः शुंभानुजोदैत्यविशेषः स्पष्टमन्यत् ४६ प
द्मिनीति पद्मिनीस्त्रीविशेषेपिसरस्यामेवुजेपिचेतिविश्वः दधतीनीलपद्मेवेति
तंत्रचूडामणिदर्शनात् ४७ वसुधेति वसुद्रव्यंदयातिपृथ्वीरूपत्वात् अथवाव
सेवअग्निंदधातितन्मयभालनेत्रत्वात् यद्वा वेणेषण्एआदेवडपदेशादत्वात्तअनेमि

© Dharmartha Trust J&K. Digitized by eGangotri

न॰ द॰
टी॰
३०

निकमात्रं श्रितिद्वप्रतिषेधयुक्तिसिद्धांतात् ततो यज्ञे भाकत्वत्पयः वस्यशोव
सप्तषोडशः खेनमानं स्याद्यावदाह्लादकत्वात् ९८ पृथ्वीति महापरिमाणत्वत्या
श्राकाशं शंकरो देवः पृथिवी पाकर प्रियेति लिंगपुराणोक्तेः ९९ रोहिणीति रो
हिणी कद्रु रोहिण्यां रोहिणी लोकनायका केदारे गौतरेमेव सोमवल्कोचरोहिणी
तिविश्वः यद्यावत्याः रक्तत्वात् रूपणलोहितत्वेवोध्ये श्रावि भ्रमी मामरणानिवृत्ता
मितितत्रोक्तेः रोहिणी नक्षत्रविशेषो वा तस्याश्च देवत्वात् तथा च मत्स्यपुरा
णे देहत्यागसमये दक्षं प्रति सती वाक्यं मदेशो शागना षष्ठिमेव विद्यातंगया
स्त्वेति तदानप्रक्रमेव सप्तविंशतिः सोमाय नक्षत्राख्या ददौ प्रभुरिति उक्ते त
त्र षष्ठिकन्यानां मध्ये याया अश्विन्यादिका तत्रेदमेव व्याख्यानमवसेयं विशिष्यतत्रा
मानि च तत्र दर्शयिष्यामः अथवा सोमात्मकस्य देवस्य महादेवस्य हरिभिः दयि
ता रोहिणी प्रोक्ता बुधसैव शरीरजइति लिंगपुराणोक्तेः अत एव तत्रोक्तं चंद्रा
द्वैषो घरमंडो रोहिणीह दवल्लभेति अथवा रोहिण्याः सप्तनक्षत्रतात्मजा दोषा

हि ४

३०

© Dharmartha Trust J&K. Digitized by eGangotri

प्राह्येन विधानादिदं ज्ञेयं बलदेवजननीरूपनाह्वा ९ वाक्यप्रमाणपदसागरपारगस्य
लक्ष्मीधराभिधयज्वनस्तनूद्भवेन विश्वेश्वरेण विहिते गिरिजाभिधार्थचिंतामणौ विहम
सूषड्निस्तृतीयः २ अथ तृतीयशतस्य व्याख्याने विंध्यवासिनीति अत्रार्थे हरद्रूनोयवासे
न ब्रह्मणोग्रे देव्या नीलतवस्या गोकुले सति मत्स्यपुराणे तवासौ वाभवद्भीमा चंटाहस्ता त्रि
लोचना नानाभरणभूषणांगी पीतकौशेयवासिनी नामब्रवीत्ततो ब्रह्मा देवीं नीलांबुजत्विषं
निशुंभश्च रजादेह संपकीर्ते मम आज्ञया संप्रमाकृतकृत्यतमेकानेशणपुराह्यासि यथषसिंहः
प्रोद्भूतो देव्याः क्रोधाद्धरानेनैस ततेस्त्वं वाहनं देविके तेनोवास्त महाबलः पांचालोनामयद्वो
यं यक्षलक्षपदानुगः दत्तस्ते किंकरो देवि महामयाशतां कुलः इत्युक्ता कौशिकी देवी वि
ध्यशैलं जगाम हेति १ शिवेति शिवा गौरीत्युपक्रम्य शिवा क्रोष्टेति पाश्वतः शिवास्व
नः श्रेयस्करी तादिति स्वामी कुलचूडामणौ पशुरूपधरां देवीं यो नार्चयति निर्जने शिवा
रावेण तस्याशु सर्वं नश्यति निश्चितं २ शक्तिरिति शक्तयो गिरिजा देवी शक्तिमंतोथ शंक
र इति कूर्मपुराणे पशुपक्षिनरभेदविशिष्टा शक्तिर्वा पशुशक्तिः पक्षिशक्तिः नरश

© Dharmartha Trust J&K. Digitized by eGangotri

ना॰स॰
टी॰
३१

क्तिरिति क्रमात् इति चूडामणिवचनात् शिवागमेप्युक्तं शक्तिः शिवः शिवः शक्तिः
शक्तिर्ब्रह्मा जनार्दनः शक्तिरिन्द्रो रविः शक्तिः शक्तिश्चन्द्रो ग्रहा ध्रुवं शक्तिरूपं जगत्स
र्वं यो न पश्यति तारकी ३ महाशक्तिरिति कर्मधारयो बहुव्रीहिर्वा महत्तमप्रतिहत
त्वं यस्याः शक्तिरायुधविशेषः शिवारूपा वा यस्याः तथा च कुलचूडामणौ एकयाभ्य
र्चिते यत्र शिवया देवभैरव तत्रैव सर्वशक्तीनां प्रीतिः परम दुर्लभा उत्कृष्टा प्रीतिर्भव
तीत्यर्थः ४ शांकरीति शंकरस्येयमित्यण् ५ शक्तिदुर्लभेति शक्तयस्तिस्रः प्रभा
वोत्साहमन्त्रजा इत्यमरः ताभिर्दुर्लभा भक्तिमात्रगम्यत्वात् तथा च कूर्मपुराणे भग
वच्छक्तिः यत्तमेनिष्कलं रूपं चिन्मात्रं केवलं शिवं सर्वोपाधिविनिर्मुक्तमनन्तमम्
तं परं ज्ञानेनैकेन तल्लभ्यं क्लेशेन परमं पदं ६ दैत्यप्राणहरेति व्यक्तार्थमेतत् यद्वा
दैत्यान्प्राणिति पालयति दैत्यप्राः प्रा धातोः कः प्रत्ययः तस्य प्राणशब्दः प्राणैरेणेत्यादौ
पठिताद्ब्रह्मार्थाद्ध्वजन् शुम्भादीनां गर्वं शाल्कापहारित्वात् ७ दात्रीति सर्वाभिणषा
नामिति यावत् अत एव कर्मविशेषाप्रयोगः ८ दयेति दयदानगतिरक्षणहिंसादा

31

३१

© Dharmartha Trust J&K. Digitized by eGangotri

नेषु दयनेरन्तिसर्वोपद्या:अनियवाघव् परेवावेश्वंवर्गोवामित्रहेहरिवामदा आय
नेरन्तिनवेन्तदयेषायरिकीर्त्तिनेतिदाहस्यनिवचनात् ९ दामोदरप्रियेति उलू
खलेवंयनाद्दामोदरसंज्ञेमिहरिवंशादौ १० कान्तिरिति कान्तिशोभाभिलाषयो:
रितिविश्व: पीतशाक्तिरूपताद्वा क्षेमंकरीति कुशलेक्षेममस्त्रियामित्यमर:
क्षेमप्रियेत्यादिनाखविमागम: पालिविशेषरूपेतियावत् तथाचनमस्कुर्या
दित्यनुहृदौक्तुलचूडामणौ क्षेमंकरीनथावीक्ष्य जंबुकीशिवरूपिकामित्यादि
बुद्धिरिति भक्तानांतद्विशेषावहत्वात् वेदान्तिनोमतेज्ञानस्वरूपताद्वा १२ बौद्धावा
रपरायणेति बुद्धयवबौद्ध: स्वार्थेप्रज्ञायण् बुद्ध:कल्कीतितेक्रमादितिभगवदव
तारगणनेमत्स्यपुराणे तस्यावतारकालरूपेपरायणे तत्प्रियत्वात् तदुक्तं म:
हाचीनक्रमेणैवतद्यानीलसरस्वतीति १३ श्रीविद्येति प्राधान्यार्थश्रीशब्दप्रयोग:
षोडशाक्षरीचेयमितिज्ञानार्णवे वक्त्रकोटिसहस्रैस्तुजिह्वाकोटिशतैरपि वर्णि
तुंनैवशक्येयंश्रीविद्याषोडशाक्षरीतिक्तं: १४ भैरवीति बाला भैरवी सुंदरीति त्रय

© Dharmartha Trust J&K. Digitized by eGangotri

त॰स॰
टी॰
३२

स्त्रिपुराभेदाः त्रिपुरात्रिविद्यादेवीनित्यानामार्णवात् तत्रैव यथाश्रीत्रिपुराबालान
था त्रिपुरभैरवीति योगिनीविशेषो वा भैरवी वा हंसं प्रोक्ता योगिन्यस्ताः प्रपूजयेदि
त्याथर्वणात् यद्वा भीरूणां स्त्रीणां प्रियमभेदसेवं येनेति भैरवी विशेषात्त्वंगनाभी
रुरित्यमरः १८ भवेति भवगेयेत्यादिनानिपातः भवतीति शुत्यन्तासर्वदाविद्यमा
नत्वलाभः यद्वा भक्तानां कल्याणहेतुत्वाद्वा १९ भारतीति भारतमस्यास्त्यास्तत्व
प्रयोजकत्वात् कोविदाप्राप्यकवयोभारतादीन्प्रचक्रिरे इतिफेत्कारीयात् कवचप्र
संगे आसां पात्रस्थयोये न भारतादीन्प्रचक्रिरे गंधर्वतंत्राच्च २० भयनाशिनीति तथा
च ब्रह्मसंहितायां पर्वते उजटे वापि निर्जने वा वनेः पथे जलावर्ते पयोदं दृष्टिभये चौरादि
भयप्रागते नगरे हट्टके वापि महाराजानलेषु च नदीतीरे व्यालभये हाकिन्यादिभये
षु च जपेडक्तविधानेतान्भयमाशु विनाशयेत् हरिवंशे संग्रामेषु च घोरेषु अग्निप्रज्व
लितेषु च नदीतीरेषु वीरेषु कान्तारेषु भयेषु च प्रवासे राजवंधे च शत्रूणां च प्रमर्दने
प्राणात्ययेषु सर्वेषु त्वं हि रक्षा न संशयः २१ तापसीति अपवेतिमत्वर्थीयोऽण् श्रमेत

32

३२

© Dharmartha Trust J&K. Digitized by eGangotri

तादेवसिद्धेतपःसहस्राभ्यामितिविनिवियानस्यत्रणादिभिः सहसमावेशज्ञायकत्वात् ता
मग्निवर्णांतपसाज्वलंतीमितिमंत्रलिंगात् २१ तारिणीति तारयतिसंसारादित्यर्थः २२ती
क्ष्णेति अतिभीषणत्वात् विद्रावयतिमुक्तास्येतिमत्स्यसूक्तारव्यावनादिशेषेवाइदंक्ष्णेयं
तीक्ष्णदैत्यविनाशिनीति तीक्ष्णस्वामसत्वात् वक्ष्यमन्यत् २३ दात्रीति दोग्धवरवंडने
त्वलेतान्ङीप् जाड्यंत्यस्यकपालेकेत्रिजगतांहंत्त्वग्रतारास्ययमितिफेत्कारिणीतं
त्रात् २४ दानपरेतिसर्वेत्वलेतान्ङीप् दानदासक्तत्वात् यद्वास्वकर्मानुरूपफ-
लदानात् आशापात्रहृयेरितिभाष्योक्तेः २५ कालीति कालीतिकृष्णवर्णत्वात् का
लीकालिंजरेगिराविति मात्स्ये लिंगपुराणे ततःप्राणमयोरुद्रः प्रादुरासीत्प्रभोर्मुखा
त् अर्द्धनारीश्वरोभूत्वाबालार्कसदृशद्युतिः तदेकादशधात्मानं प्रविभज्यव्यवस्थितः
अर्द्धेनस्येनसर्वात्मासृजत्सोशिवासुमां सावासृजत्तदालक्ष्मीं दुर्गांश्रेष्ठां सरस्व-
तीं वामांरौद्रीं महामायां वैष्णवीं वारिजेक्षणं कलांविकरणीं चैवकालींकमलवा
सिनीं बलिविकरणींचैवबलप्रमथनीं तथा सर्वभूतस्यदमनीं ससृजेचमनोन्म

© Dharmartha Trust J&K: Digitized by eGangotri

त॰स॰
टी॰
३२

नी तथा[illegible]बहवः सृष्टास्तयानार्यः सहस्रशः २६ दुर्गेति देवीविशेषोयेग्रा[illegible]सः २७
दैत्यविना[illegible]तितमोगुणपरिणामतयादैत्यमोहादयः तेषांविशिष्टस्यसवासनस्य
प्रतियोगिकस्यनाशस्यजनकत्वात् तथाचश्रुतिः भिद्यतेहृदयग्रन्थिःछिद्यन्तेसर्वसंशया
स्तीयन्तेचास्यकर्माणितस्मिन्दृष्टेपरावरे २८ पद्मेति श्रीरूपत्वात्पद्महस्तत्वाच २९ पद्मा
वतीति माडपयायाइतिवत्ते शरादित्वाद्दीर्घः तथाचताराभेदप्रकरणेवीरचूडामणौ
पद्मावतीमहादेवीमहानीलसरस्वतीत्यादिप्रक्रम्यत्रयोदशमहाविद्यास्ताराया परि
कीर्तिताः ३० हंसेति नीलवर्णत्वात् हकारःशिवःसवाचकः शक्तिश्चनिर्दिष्टाचकः तयोरे
क्येपरंब्रह्महंसइत्यभिधीयते इतिश्रुत्याहंसोस्यस्यास्तादात्म्यसर्वेयमेतिवार्थः यद्वा
हंसोवेदव्यासोस्यस्याउपासकत्वात् वेदव्यासोपियकृतासर्वज्ञःपठनाद्यतइतिभैरव
तन्त्रात् हितायजगतांदेवीदक्षिणराधितापुरा कार्यार्थंदक्षिणेतस्याः शुक्लोवामेत
यासितः आत्मानंविभजस्वेतिप्रोक्तादेवेनशंभुना सातथोक्ताद्विधाभूताशुक्लाकृ
ष्णाचवैद्विजा इतिलिंगपुराणाद्वा ३१ पुष्टेति पुष्पपुष्टोनिष्ठोतः सर्वदायकत्वेनतात्

33

© Dharmartha Trust J&K. Digitized by eGangotri

यें ३२ तुष्टेति तुष्टप्रीतौ पूर्ववत् आप्तउर्वशीतिकामइतिश्रुतेः ३३ ऊरुस्थसत्तेनारायग
णोरूद्भवतात् ऊरूद्भवानरसखस्यमुनेः सुरस्त्रीइतिदर्शनात्पोदरादित्यात्मास्तुः ऊरू
प्रभृतेवर्षिकामायतेइत्यादयोनिरुक्तादिषुत्पन्नथाविस्तरभयाल्लिख्यंते ३४ वज्रिणीति
अज्ञेन्द्रेत्यादिनावज्रशब्दोनिपातः ३५ वज्रहस्तेति वज्रंहस्तेयस्याः प्रहरणार्थेभ्यः परेनिष्ठा
सप्तम्याविति परनिपातः सप्तम्याः वज्रमिंद्रः समुत्पन्नंकालिष्णाद्मरादिपइतिमार्कंडे
यपुराणेतदुक्तत्वोक्तेः वज्रवायाभिधाविरिणीतिनवरात्रिप्रकरणेपूज्यमूर्तिलक्षणेभवि
ष्यपुराणे ३६ नारायणीति आपोनाराइतिप्रोक्ताआपोवैनरसूनवः अयनंतस्यताः पूर्वंते
नारायणः स्मृतइति पुराणव्युत्पत्तिः नरशब्देनततांस्तुच्यतइतिपंचरात्रादिव्याख्याननतय
वंतया ३७ शिवेति व्याख्यातप्राये शिवंसुखंअस्त्यस्याइतिवा शिवयतिभक्तान्सुखयति
इतिवा मुक्तिदानेनाशिवहत्याकरोतिवा ईशानस्यजगत्कर्तुर्देवस्यपरमात्मनः शिवादे
वीत्युपेहमाथतत्साध्यपुराजतइतिलिंगपुराणात् ३८ खड्गिनीति खड्गेनतिस्त्रिंशश्चंद्रहा
सासिरिष्टयइत्यमरः खड्गोत्यस्याःपूजाधारसेवयेनेत्यर्थः तथाचदेवीपुराणे हेमराजत

© Dharmartha Trust J&K. Digitized by eGangotri

न॰स॰
टी॰
३४

34

मृद्धात्तशीलविद्यार्पितापिवा खड्गमूलेर्चितादेवी सर्वकामफलप्रदा पययस्याखड्गंप्रोक्तं
तस्मिंस्तांप्रतिपूजयेत् यद्वा गंडके खड्गखड्गितौ इत्यमरः सोस्त्यस्याः वलितेनेत्यर्थः कुल्स
सारस्यमांसेन तथा खड्गेन वेडिका वर्षाण्येवप्रतान्येवतृप्तिमाप्नोति निश्चितमिति कालिका
पुराणोक्तेः ३९ खड्गहस्तेति स्पष्टमेतत् तथा च तंत्रचूडामणौ खड्गेन दक्षिणस्यार्द्धे शोभि
तां वीरनादिनीमिति ४० कर्त्रीकर्परधारिणी कर्त्री आयुधविशेषः स्यात्कर्परः कपालोऽ
स्त्रीत्यमरः कर्परोल इति ललवाङ्गलकालेति स्वाम्यादयः उक्तं च फेत्कारिण्यां खड्गंदीचव
कर्त्रिकर्परसंभजेति ४१ देवांगनेति अंगनात्कल्याणे इत्येतगं णस्तथात्याशस्त्यार्थे वामादित्वा
न्नप्रत्ययः यद्वा देवा अंगने गृहचत्वरे यस्याः सेवार्थं तत्रोपास्थितत्वात् यद्वा देवप्रमुक्तं अंग
नं यस्या इत्येवसमासः अर्थस्तु प्राग्वत् अथवा देवे इंद्रियं तद्विषयकं अंगनं ज्ञानं साक्षात्का
रूपं यस्याः इंद्रियपदस्य अतींद्रियोपलक्षणात् तथा अतींद्रियज्ञानवतीत्यर्थः देवः सुरे घनेरा
ज्ञिदेवमाख्यानमिंद्रिये इति कोषः अंगिगतौ अस्य ल्युटि अंगनमिति रूपं यद्वा देवानां अंग
ने ज्ञाने यस्याः पूर्वपदे सप्तमी वा पिते विषयत्वे षष्ठ्यर्थः तेषामपि ब्रह्मज्ञानाधिकारात् तथा ·

© Dharmartha Trust J&K. Digitized by eGangotri

चवेदांतसूत्रे भावेत्तबादरायणोःऽस्तिहि ग्रस्यार्थस्तु⋯⋯ ब्रह्मविद्यायांदेवानामनधिका
रेपि शुद्रब्रह्मविद्यायांअधिकारस्यभावेसत्वो वादरायणआचार्योमन्यते यतोदर्शनमः
स्तितथाहिदेवानांप्रत्यक्षत्वात्तस्यवत्तदभवदिति तथा इंद्रोवैदेवानामभिप्रवव्राजविरोचनोसुरा
णामित्यादि ४२ देवमान्येतिस्पष्टार्थः ४३ देवकन्येति कुलचूडामणौ कदाचित्यतिरूपोसि
कदाचिद्रुरुरेवच कदाचित्सुव्रतापन्नः कदाचिद्विक्षिप्तएवहि इत्यादिभैरवेप्रत्युक्तिः ४४ पुर
लोमजेति प्राचीनूपत्वात् पुलोमादैत्यइतिरामायणादौ मुनिरितिस्वाम्यादयः ४५ स्वरिव
नीति नित्ययोगेमतर्थीयः ब्रह्मरूपत्वात् ४६ स्वदात्रीति सिद्धविद्यानेनसाधनक्लो
शाभावात् स्वर्गापवर्गादिदानाद्येत्यर्थः तथावमेडमालायां दशविद्याकथनानंतरे सुः
खदामोक्षदानित्याक्लेशसाध्यानतादृशी येनतेनप्रकारेणसिद्धिंयास्यतिभूतले तथा
नात्रसिद्धाद्यपेक्षास्तिनक्षत्रादिविचारणा कालादिशोधनंनास्तिनचामित्रादिदूषणंइ
त्यादि ४७ सर्वसौख्यविवर्द्धिनीति स्वपदात्स्वार्थेष्यञ् विशेषेणवर्द्धयतितथासर्वसौ
ख्यतिकर्मयात्रयः षष्ठीतत्पुरुषोवा ४८ पृतिशीलमस्यस्याः तर्शआदिः शुवौत्व

© Dharmartha Trust J&K. Digitized by eGangotri

वतीतिपीलेइत्यमरः ४९ पीलवतीतिपूर्ववदर्थः ५० सूक्ष्मेति सूक्ष्मंस्याकवतेयामेष्यणीमह
द्भिमोल्पकेत्पवदितिविश्वः [illegible]जाभोदत्तजत्रीक्षणश्चापितूपंपरेन्नाभिजानंतिमायामयेन
स्तवेत्येवतांतामममीस्थूलरूपामितिप्रपंचसारात् ५१ सूक्ष्माकारेति विशन्तेतत्स्वरूपि
णीमितिनीलतंत्रात् ५२ वरप्रदेति तपोभिरिष्यतेयस्तु देवेभ्यः सवरोमतः इत्युकल
क्षणंवरंप्रकर्षेणददातितथा प्रकर्षस्तेदेवांतराशक्यदानकत्वरूपः ५३ वरेणेति
व्रियतेसर्वोत्कृष्टत्वादिति वरेण्या वृञ् इति औणादिकएण्यः ५४ वरप्रदेति भक्ता
र्थं ५५ वाणीति वणतिशब्दायतेतथा वचनाधिष्ठात्रीदेवतायानामेदं वाणस्यास्तुरवि
पौषस्येयमितिवा तस्यरुद्रेणपुत्रीकृतत्वात् वाणश्चेदभेदस्तुत्वा तिलकेमालतीबाणा
स्तुलसीभृंगराजकं तमालंशिवदुर्गार्थे निषिद्धंविहितंभवेत् इतिभविष्यपुराणोक्ते : ५६
ज्ञानतीति प्रशस्तंज्ञानमस्याः प्राशस्त्यंचसन्मात्रविषयकत्वं ५७ ज्ञानदेति मोक्ष
देतुज्ञानंददातिभक्तानांतथा तडुक्तमाथर्वणब्राह्मणे एतस्याःज्ञानमात्रेणजीवन्मु
क्तोवैभवत्येव नामेत्यसर्वज्ञानवान्भवतिइत्यादि ५८ अमलेति प्रपंचान्तर्गतत्वादा

विद्यादोषरहितेत्यर्थः अविद्यासंसृतिर्वंधोमनोमोहोमलंतमः इतिसंकल्पजालस्यनामान्ये
तानिराघव इतिवाशिष्ठोक्तेः ५१ उग्रकालीति आन्महत इत्यात्वे महाकालीचरुद्राणीयोगिनी
प्रक्रमेस्मृते सावाग्राह्या ५८ भद्रकालीति श्रेयस्करत्वाद्भद्रावासौकालीतथा भद्रकालीचया
योल्पास्तुमायामोषधीभिदीतिविश्वः इतिवाएणीरमाज्येष्ठाभद्रकालीयथाक्रमात् षट्कर्मदे
वताःप्रोक्ताःकर्मादौताःप्रपूजयेत् इतिवारिककर्मदेवतावाबोध्या ताराचोग्रामहोग्राचरु
द्रानीलसरस्वती कामेश्वरीभद्रकालीत्यष्टौचतारिणीस्मृतेतिमायायांतंत्राद्धा ५२ दक्षिणे
ति वैदग्ध्यादित्यर्थः यद्वाव्यापकत्वाद्दक्षिणभागसंप्रक्तत्वं ब्रह्मवेदममृतंपुरस्तात्पश्चाद्ब्र
ह्मदक्षिणतश्चोत्तरेणेतिश्रुतेः दक्षिणाकालीत्यर्थोवा तथाकुलचूडामणौ सर्वसि
द्धिप्रदादेवीहेलयापिनिवर्तिता अतएवदक्षिणानाम्नीत्रिषुलोकेषुविश्रुता यज्ञांगदक्षिणा
वा यज्ञांगंषवेषस्यदक्षिणास्मरसइतिश्रुतेः तथायहविशेषे ऋत्विजांचैवदक्षिणेति लिं
गपुराणे संमतेतुमहादे...रुद्राणीदक्षिणास्मृता ५६ भृगुवंशसमुद्भूतेति भृगुशुक्रेप्र
तापेचयमदग्नौपिमालिनीति विश्वः भृगोःरुद्रस्यवंशःसमुद्भूतोयतइतिवाबहुव्रीहिः सं

© Dharmartha Trust J&K. Digitized by eGangotri

न॰र॰
टी॰
३९

36

दादिजननादित्यर्थः सइममेवात्मानं द्वेधापातयत्ततः पतिश्च पत्नी चाभवतामिति
श्रुतेर्वा ९४ भार्गवीति भृगोरपत्यं स्त्री हृष्यत्वादित्यर्थः साहि पूर्वं भृगुकन्या वासीत् त
तोऽर्वासमसः शापात्क्षीरा पुनः समुद्राद्भवेति स्थितं विष्णुपुराणे तदुक्तं भृगोः ख्यात्यां
समुत्पन्ना श्रीः पूर्वमुदधेः पुनः देवदानवयत्नेन प्रसूतामृतमंथने यद्वा भार्गवी दूर्वा
तया होमविधानात् तथाच सिद्धसारस्वते दूर्वातिलाज्यहोमेन दीर्घमायुरवाप्नुयात्
सह स्ववीर्या भार्गव्यादिनिर्दूर्वापर्यायेष्वमरः भार्गवी हैमवत्यां स्यात्कमलादितदूर्व
योरिति विश्वः ९५ भृगुवल्लभेति ब्रह्मायमिति होमासा मत्स्यपुराणीयः वधार्थमिदस्यस
मुद्यतायादेव्याशिरोच्छेदिसदर्शनेन योषिद्वधाद्विस्मयो विगर्हन् भृगुः पुनः प्रत्युद
जीवयत्तो भृगुभंगादिहा देवः ख्यातिस्त्रिनेयन प्रियेति लिंगपुराणाद्वा ९६ शूलिनी
ति शूलं प्रहरणे मृत्यावोतविश्वः शूलिनी संकुडुर्गायामत्र ग्रहो वाय्यः ९७ शूलेह
स्तेति त्रिशूलं खड्गकर्तृकेति ध्यानभेदश्रवणात् त्रिशूलं दक्षिणे दद्यादिति मात्स्य ९८
मयूरवरवाहनेति मयूरो वर्हिणो वर्हीत्यमरः न निर्धारणे निषेधात्सप्तमीसमासः

३९

© Dharmartha Trust J&K. Digitized by eGangotri

सर्वंस्याद्वाहनेपानेइत्यमरः कौमारीरूपेणेदंवोध्यं ६९ महामांसरतेति मांसेतुत्रिविधेदे
विजलणेचरस्थचरे गोनरेभाश्वमहिषवराहाजमृगोद्भवं महामांसाष्टकंप्रोक्तंदेवताप्री
तिकारकं इतियामलोक्तेः ७० रक्तेतिलोहितवर्णेनात् यद्वा श्रेयकासुररुधिरसेपकीन्
तस्याश्चवामनपुराणे ततःस्वेदोभवद्भूरिश्रमजःशंकरस्यतु ललाटफलकेतस्माज्जातात
कन्यासृगाप्लुतेतिप्रक्रम्य तांपूजयिष्यंतिगणाःमहर्षयःपितरोगणाः यक्षाविद्याधरा
श्चैवमानवाश्चशुभंकरि स्तोष्यंतिचनसंदेहोवलिपुष्पोत्करोत्करैः चर्चिकेतिशुभेनाम
यस्माद्रुधिरचर्चिता इत्येयमुक्तावरदेनचर्चिकाभूत्तातुयाताहरस्पृष्टवासिनी महीस
मेताद्विचचारसंदर्शस्यानेगतार्हिंगुलिमद्भिमत्तमे ७१ रक्तकर्परधारिणीति वागीश्वरी
ध्यानेतु कपालंवामहस्तेतुमांसशोणितपूरितमिति पद्मपुराणाद्वा यद्वा स्त्रि
लमस्ताद्रूपेणेदंज्ञेयं स्वमस्तकंसकर्परंरक्तधाराभिपूरितं इतितदीयध्यानोक्तेः
अन्यथा तदक्षस्तात्कपालकं जगतांजाड्यसंयुक्तंदधतीदक्षिणेकरेइतितंत्रचूडामणि
विरोधापत्तेः ७२ रक्तांवरधरेति जलतारायामिदंवोध्यं स्मेरारक्तविभूषणामिति

© Dharmartha Trust J&K. Digitized by eGangotri

ता॰ र॰
स्त॰
३८

वीरचूडामणिदर्शनात् अथवा त्रिपुरायां मंडलस्थं चंडितां गीमरुणतरदुकूलानुलेपां नमामीति प्रपंचसारात् अथवा तत्रैव संपत्प्रदभैरवी रक्तांवरपरीधानामिति ज्ञानार्णवात् ७३ रामेति रमन्तेस्यां रामा ज्वलादित्वात् णः स्कंदस्त्री रमणी रामेत्यमरः ७४ रमणीति रमन्तेस्यां योगिनोस्यां ब्रह्मरूपत्वादित्यर्थः अथ मर्त्यो मृतो भवत्यत्र ब्रह्म समश्नुत इति श्रुतेः ७५ सुरनायकेति नायको नेतरि श्रेष्ठे हारमध्यमणावपीति विश्वः ७६ परमानंदजेति परमानंदे मोक्षरूपे भवा अक्षमागम्यत्वात् परमा महालक्ष्मीस्वरूपा वा सौ नंदजेति कर्मधारयो वा ७७ ज्येष्ठेति अतिशयेन प्रशस्या ज्येष्ठा प्रशस्यस्य इष्ठनि ज्यादेशः ज्येष्ठाख्या उच्चाटनदेवता वा उक्तवचनात् अन्यमात्रसर्ववर्त्तिनीति वार्थः तथा च श्रुतिः ब्रह्मज्येष्ठा वीर्या संभृतानि ब्रह्माग्रे ज्येष्ठं दिवमाततान ब्रह्मभूतानां प्रथममनुयज्ञेनेनार्हति ब्रह्मणा स्पर्द्धितुं क इति ७८ योगिनीगणसेवितेति देवीपुराणे कापी खेडी दावेताः प्रसिद्धा अथवा महाकाली रुद्राणी उग्रा भीमा ततः परं घोरा च भ्रामरी चैव महारात्रिश्च सप्तमी भैरवी चाष्टमी प्रोक्ता योगिन्यस्ताः प्रपूजयेदित्याथर्व

३८

© Dharmartha Trust J&K. Digitized by eGangotri

ऐणेत्याग्राहुः ७९ अंबेति लोकानां मातृरूपत्वात् यतस्मादात्मन आकाशः संभूतः आका
शाद्वायुरित्यादिश्रुतेः चंडिकायां अजायत जगन्मातराकाशेन भसोनिलः समीरणाद्दहनस्त्रि
रंभसापस्ततोमही ८० सत्यवतीति नित्ययोगे इनिः व्यासमातात्वाद्वा विस्तरुद्रांशसंभवमि
तिव्यासविशेषश्रवणात् कदाचित्तत्र नायन्न इति कुलचूडामणौ शिवं प्रति भगवत्युक्तेश्च ८१
सत्येति जगत्कर्तृत्वानुमानेन ईश्वरसिद्धेः प्रमाणविषयस्य वस्तुनः परमार्थिकत्वनि
मात् ८२ सत्यभामेति सत्याः सफला भामाः क्रोधा यस्याः यन्मार्कंडेयपुराणे रोमान
शेषानपहंसि तुष्टा रुष्टा तु कामान्सकलानभीष्टान् भामक्रोधेत्यजेतः जगत्संहारेच्छा
वा भामपदेनोक्ता सात्रापीतिवा आहुः ८३ नगात्मजेति नगाः पर्वतास्तदात्मजा यस्याः
जन्यमात्रं प्रतीश्वरस्य हेतुत्वात् तेषामस्मादायजन्मत्वे वक्तृत्वात्मायकत्वयाविशिष्यनिर्देशः ८४
रौद्रेति रौद्रस्तु ग्रममीत्रिषु इत्यमरः रुद्रस्यायमिति स्वामी ८५ रौद्रस्वनेति घोराट्टहास
रवेति फेत्कारीयात् ८६ रुद्रेति ...... तीत्यर्थः मंत्रभाष्योक्ता अथवा ईषा
ययभावः क्षोदसत्वात् ८७ रौद्रदैत्यविनाशिनीति रौद्रान्जगड्डहेजकान्महिषादिदैत्या

© Dharmartha Trust J&K. Digitized by eGangotri

त॰स॰
टी॰
३८

38

न्विनाशयति तथा सैन्यसाहित्यं विशाल्वार्थः ८८ कुमारीति कन्याकुमारीत्यमरः
कुत्सितो मारोऽस्याः अत्र तु छत्रादेरिति स्वामी न तथा तथ्यं तेन शक्रजपहोमार्चनादिभिः
कुमारीपूजनेनात्र यथा देवी प्रसीदति इति देवीपुराणात् होमादिकं तु सकलं कुमा
रीपूजनेन विना परिपूर्णं फलं नैव सफलं पूजनाद्भवेत् इति ज्ञानार्णवाच्च अत्रः
मारस्य महाशर्यां कुमारीत्वमिति ८९ कौशिकीति कुशिकस्य तु गोत्रेण कौशिकी
त्वं भविष्यसीति हरिवंशे मार्कण्डेयपुराणे तु शरीरकोशाद्यत्तस्याः पार्वत्या निःसृ
ताम्बिका कौशिकीति समस्तेषु ततो लोकेषु गीयते इत्युक्तं कौशिकी चण्डिकायां
च नदीभेदे च कौशिकीति विश्वः यद्वा कोशाद्भवदिव्यदेवतात्वात् तथा च याज्ञवल्क्यः
देवानुग्रान् समभ्यर्च्य तत्स्नानोदकमाहरेत् संस्राव्यं पातयेत्तस्मात् जलं च प्रसृतित्रयं उ
ग्रान् दुर्गादित्यादीन् इति विज्ञानेश्वरः तथा च पितामहः भक्तो यो यस्य देवस्य पाययेत्
स्नानजलं समीभावे तदेनानामादित्यस्य तु पाययेत् दुर्गायाः पा॰ घयेद्वा तान् ये च शाक्तो
पजीविनः भास्करस्य तु यत्तोयं ब्राह्मणेन तु पाययेत् दुर्गायाः स्नापयेद्बालमादित्यस्य तु

३८

© Dharmartha Trust J&K. Digitized by eGangotri

मेरुत्वं अन्येषामपि देवानां स्थापयित्रीमुखानि ९० विद्येति पूर्णे ति यद्व्याख्यातं दाहृतं कर्म
पुराणमत्रावधेयं विद ज्ञाने विदंयाति प्राप्नोति विद्येतिवार्थः ९१ कालदैत्यविनाशिनी
ति कृत्स्नवर्णो दैत्यान् कालं भक्तानां दैत्यांश्च नाशयतीतिवार्थः ९२ शंभुपत्नी ९३ शं
भुरता ९४ शंभुजायेति नामत्रयं व्याख्यातवर्तिपदार्थं तात् पृथक् न व्याख्यातं ९५ म
होदरीति नासिकोदरे तिङीष् खर्वीलवोदरी भीमामिति त्फे तत्र रिणीनं त्रात् ९६ शि
वपत्नीति शिवः शूली महेश्वरइत्यमरः ९७ एतेन शिवरता ९८ शिवजायेति ९९
नामद्वयमपि व्याख्यातं अंबिकेति अंबिनवीसोदयः प्राह्यार्थाः अंबते शब्दं करोति अंबिका
कर्त्तरि एवुल यद्वा अमरोगोश्च स्माद्विन् अमरोगं ददाति प्राप्नुवंति अंबारोगिणः तेभ्यः तस्मात्स
उपकारकत्वादित्यंबिका मत्वर्थे ठन् १०० वाक्यप्रमाणपदसागरपारीणस्य लक्ष्मीधराभिध
बुधस्य तनुजन्मेन विश्वेश्वरेण विहिते गिरिजाभिधार्थचिंतामणौ विहमयूखश्चतस्तृतीयः ४
दंष्ट्राकोटिकरालवक्रकुहरे स्फूर्यैंडवह्नीक्षणं सद्योहुतकसानरोत्तमांगजमहामाल्याव्युपा
लंकृते प्रेतोरस्वरणद्वयं प्रतिलसत्कांचेतराभ्याद्रिकं तेजः किंचिदनंतमेकमनिवचोगम्यंप्र

© Dharmartha Trust J&K. Digitized by eGangotri

पश्यामहे सांप्रतं वक्तुमर्थं शतव्याख्याने हरपत्नीति हरति लोकान् पापं वा हरः एतेन
हरस्य हर इजायेत्युक्तनामनी व्याख्याते प्राये ३ शूलिनीति शूलं यदा ट न्नोऽम्भोऽडीष् यद्वा शू
ले पूजाविधानात् खड्गे शूले चर्चिता देवीति प्रागुदाहृतवचनात् वेदयत्तो ग्रहो नाम लो
केषां सचराचरः शूले संपूजिते वत्स सर्वं भवति पूजितमिति कल्पतरौ देवीपुराणात्
मदनान्तककान्तेति मदनो मन्मथो मार इत्यमरः अन्तयतीत्यन्तकः शिवः ५ मदना
न्तकवल्लभेति व्यक्तं यद्वा मदनविजयितेनोमयत्रवौद्धोऽभिमतः नदाचारप्रियत्वादे
तत् ६ गिरिजा गिरिकन्यकेति द्वे स्पष्टार्थे ८ गिरिशस्य वल्लभेति गिरीशो गिरिशोम
इत्यमरः गिरौ शेते इति गिरिशः गिरौडः छन्दसीति डप्रत्ययः गिरिरस्यास्ति लोमादित्वा
त्शेणवा गिरिमवत्युपभोगेन तत्करोति वा ९ भूतेति भूतानि पृथ्व्यादीनि सत्यस्यास्त
दतिरिक्तत्वात् सृष्ट्यादौ तत्परमात्मनामुपादानाद्वेत्यर्थः यद्वा भूता चावत्तर्द्दृशीति तिर
स्यस्याः साधनोक्तत्वात् अष्टम्यां च चतुर्दश्यां पूजयेच्च प्रयत्नतः यमत्राथ्यर्थयेतमेत्रीतितदा
प्रीतिर्नित्यदा इति स्वतंत्रोक्तेः अथवा अथवापि शाचवालग्रहादि प्रयुक्तत्वात् भूतं ब्रह्मादौ

© Dharmartha Trust J&K. Digitized by eGangotri

पिशुनवादौ इति विग्रहः ९ भवेति भवं संसरत्पिशुमेवेति विग्रहः नक्काचित्तादित्यर्थः १० भवस्य
छेत्ति भवैर्जन्मभिः स्पष्टाख्यानादिरूपायाः दुर्गोयत्वात् चिन्मयस्याह्लिनीयस्य निर्गुणस्य
शरीरिणः उपासकानां कार्यार्थं ब्रह्मणो रूपकल्पनेति श्रुतेः ११ पावनीति पावय
ति पवित्रीकरोत्यवश्यमिति णिच्यन्तात् ल्युट् पाविनीति पाठे णिनिः शारदाक्षेत्रदर्शनस्य
कृच्छ्रप्रत्याम्नायत्वेन पापशुद्धिहेतुत्वात् सर्ववैष्णवमाहेश्वरसौरशाक्तादिपीठेषु द
र्शनेन योजनसंख्याकृच्छ्रसंख्येति सकलस्मार्तग्रंथदर्शनात् १२ परिपालिनीति
सर्वसंकटेभ्यः पालयति भक्तांस्तथा पारोदाणि विलुमागमः पाल रक्षणे इति चौरा
दिकाद्धा १३ अदृश्येति यद्यपि ब्रह्मात्मनोऽपि मानसप्रत्यक्षमस्त्येव मनसैवानुद्रष्टव्य
इति श्रुतेः तथापीह फलव्याप्यत्वस्य निषेधाभिप्रायेणेत्युक्तं अत एव यतो वाचो
निवर्तन्ते अप्राप्य मनसा सह इति श्रुतिः अथवा शुद्धब्रह्माभिप्रायेण विषयत्व
स्यैवायं निषेधः शुद्धब्रह्मणो हि न विषयत्वं नास्तीति वेदान्तिभिरुपगतत्वात् १४
व्यक्तरूपेति शाक्तानुसारिभिर्ज्ञानानि व्यक्तत्वात् तथा च कौर्मे ज्ञानेन कर्मयोगेन

© Dharmartha Trust J&K. Digitized by eGangotri

तपसाराधनेनैव प्राप्याहं तेमहाराज नान्यथा कर्मकोटिभिः १६ इष्टेति यजदेवपूजादौ
निष्ठायां वचिस्वपीति संप्रसारणे अथवा आत्मारूपलयाविषयत्वात् पदार्थांतरे सात्मीयाधि
कप्रियत्वस्वीकारात् नवा अरे सर्वस्य कामाय सर्वं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवतीति
श्रुतेः १७ सेष्टप्रवर्द्धिनीति स्वेषां आत्मीयानां भक्तानामिति यावत् इष्टं प्रकर्षेण वर्द्धया
तितथा स्वोत्तात्यात्मनोः स्वे निजे धने इति हेमचंद्रः १८ अच्युतेति कालत्रयेपि स्वरूपा
न्यथात्वरहिता जायते स्ति वर्द्धते विपरिणमते अपक्षीयते नश्यतीति चेति षड्भावविकाराइ
तिहस्माह वार्ष्यायणिरिति यास्कोक्तविकाररहितत्वात् १९ अप्रच्युतेति उपसर्गमा
त्रेविशेषः यद्वा वेदांतिमते ब्रह्मणो जगदुपादानत्वेन प्रकर्षेण अच्युता स्वरूपमपरित्य
ज्यैव जगद्रूपेण पर्यवसानात् विवर्त्तोपादानत्वादिति यावत् सांख्यमतेपि कार्यकार
णयोरभेदेन घटादिरूपतया नाशेपि स्वरूपेण प्रकृतेरविनाशित्वात् २० प्राणेति प्राणेति
जीवंत्यनया प्राणयति प्राणप्रहर्षे अणनिश्वासायते वा अणतेः शास्त्रार्थात्स्वार्थे च २१
प्राणदेति भक्तानां प्राणान्ददातीति तत्त्वानि क्रांतनिरासादिति भावः यद्वा ततोहमाखि

ना॰स॰ टी॰ ५१

५०

५१

लेलोकमात्मदेहसमुद्भवैः भरिष्यामिसुराः शाकैराहृतैप्राणधारकैः शाकंभरीतिवि
ख्यातिंतदायास्याम्यहंभुवी मार्कंडेयपुराणात् २२ वासवेश्वरीति वासवोहत्रहाहर्षेण
मरः वसोरपत्यमितिस्वामी यद्वा वसोर्नारायणस्यापत्यंवासवः प्रद्युम्नः शंवरवधेतस्यर
क्षितत्वात् वसुर्नारायणपुनर्वसुविश्वरूपाइतिकोशः यद्वावसवोद्रव्याणिसमृद्धोवास
वेतदात्मत्वात् २३ अयोनिधिसमुद्भूतेति लक्ष्मीरूपेणसमुद्रोत्पन्नत्वात् अथवाअयो
निधिशब्दोऽव्ययवार्थेनहद्वाचीमेरोहृदोत्पन्नत्वादस्याइतिस्पष्टमन्यत् अत्रमूलंतुप्रा
गेवोपन्यस्तं यद्वावेलारूपत्वात् समुद्रोभगवान्रुद्रोवेलाशैलेंद्रकन्यकेतिलिं
गपुराणात् २४ धारिणीति धारयत्यवश्यंलोकानितिधारिणी आवश्यकेणिनिः
ब्रह्मांडपतनप्रतिबंधकप्रयत्नाश्रयइतियावत् २५ प्रतिष्ठेति सर्वलोकप्रसिद्धत्वात् प्र
तिष्ठाख्याशक्तिः प्रागुक्तकूर्मपुराणोक्तासंजाताऽस्याइतितारकादित्वादितच्वा २६
उद्भवेति उद्भवत्यस्याःसर्वमितिब्रह्मरूपेणजगदुपादानभूतत्वात् नैयायिकमते
निमित्तमात्रमर्थः २७ क्षोभिणीति ध्यानविशेषेणशत्रुंक्षोभयत्यवश्यंतया वि

© Dharmartha Trust J&K. Digitized by eGangotri

न॰स॰
टी॰
८२

क्षोभयति संक्षोभत्वेनेति मत्स्यसूक्तवचनात् २८ क्षेमेति कुशलकारित्वात् २९ श्रीगर्भेति
लक्ष्मीर्गर्भे यस्याः महाकौलमतात् अथवा श्रीबीजयुक्तमंत्रत्वात् श्रीबीजापायदावि
यात्तदा श्रीः सर्वतोमुखीति मत्स्यसूक्तात् ३० परमेश्वरीति परमत्वं सृष्ट्यादिकर्तृत्वं
यद्यपि स्थेशभासेति वरजंतस्येश्वरशब्दस्य पुंयोगे ङीप्रत्ययः अन्यथा टाप एव प्रसंगात्
विन्यस्तमंगलमहौषधिरीश्वरायाश्चेति यावत् तथाश्नोतेराशुकर्मणि वरडित्यौणा
दिके वरटि टित्त्वोपपाद्या इतीश्वरीत्वान्ङीप् यद्वा ईशायातेः क्वनिपि वनिपि वानोन
त्यात् ङीप् एव नो र चेति रेफादेश उत्तैश्वर्यनिमित्तकोपि ईश्वरीशब्द इति बोध्यं ३१
करालेति करालं भीषणं न्यवदिति विश्वः कः सूर्यः रोऽग्निः अलोभूषा यस्याः सा त्रेत्रत्या
त इति वा ३२ पुष्टदेहेति पीनस्तनीं पीवरामिति रुद्रयामलात् यद्वा पुष्टमिति भावे
क्तः पुष्टिदा ईहा चेष्टा यस्याः हृष्टिहेतुत्वात् ३३ कारिणीति करोत्यवश्यं लोकांस्तथा
कारयति ब्रह्मणा तत्प्रवर्तनद्वारा वा कृ हिंसायां अस्माद्वा ३४ कंजलोचनेति कंजे पद्मे
समासगतायमेवायकल्लोयमास्पष्टमन्यत् ३५ शारण्येति तत्र साधुरिति यत्प्रत्ययः ॥ ३६

© Dharmartha Trust J&K. Digitized by eGangotri

कमलेति कमलाकमलालयेतिमात्स्ये ३७ प्रीतेति प्रीञ्प्रीतौ कर्तरिक्तांतं यद्वा प्री
तिपदाद्भावप्रधानादर्शआदित्वान्मत्वर्थीयोऽचूप्रत्ययः पुलस्त्यभार्यारूपत्वात् पुलस्त्यः
प्राशभृन्मौलिः प्रीतिःकांतापिनाकिनइतिलिंगपुराणात् ३८ विमलेति सर्वदोषहीन
त्वात् विमलापुरुषोत्तमेइतिमात्स्ये ३९ आनंदवर्द्धिनीतिपुत्रकार्थे तथाचब्रह्मसंहिता
यां मलवियोजयित्वात्वयानाविप्राजयेपदि सर्वसिद्धिपरिप्राप्तिदेववद्धिहरेत्नुवि ४०
कपर्दिनीति कपर्द्दोस्यजटाजूटइति शिवप्रक्रमेऽमरः उग्रःकपर्दीभवइतिहलायुधः
पद्मपत्रनखेयोगेङीप् तत्रानइत्यधिकारात् तथापिलक्षणयाकपर्दशब्दस्यैतदीयजटापर
त्वे इतिप्रत्यये अत्रेभ्यइतितांतलक्षणेङीषितिज्ञाखेयं ४१ कल्पनेति कल्पःस्यात्प्रल
येन्यायेशास्त्रेब्रह्मदिनावधावितिविश्वः प्रलयंकरोतीतिणिचतात्ल्युप्रत्ययः अथवाका
लात्मकत्वात् तथाचतत्वक्रमेकूर्मपुराणे तस्यसर्वजगत्सूतेःशक्तिर्मायेतिविश्रुता त
पदेआमयेदीशोमायावीपुरुषोत्तमः ४२ कद्रुरिति कश्यपपायत्रयोदशीतिपुराणात्कन्यकाग
तदत्तकन्यात्वयत्वात् अथवा कस्यब्रह्मणस्तद्रुःहृतवदाश्रयस्त्वता यद्वाजटायाःपिंगलवर्णे

© Dharmartha Trust J&K. Digitized by eGangotri

न॰र॰
टी॰
४२

त्वात् पिंगोऽग्रे कृष्णजटो ध्यायेदिति वचनात् ४३ सुमनानन्दवर्द्धिनीति मनुते मन इति पचाद्यचि
व्युत्पत्त्याऽहङ्कारी तेनो मनश्शब्दः सम्यग्ज्ञानेन प्रीतानां मनांसि वर्द्धयतीत्यर्थः ४४ उदीर्णेति
ऋगनाविन्यस्य उत्सवस्य निद्रायांतद्ये सहदेवेति यावत् विश्वतत्त्वविकाररहितत्वेन नित्यो
पवित्रत्वाद्वा ४५ भूषणेति भूषणानि सन्त्यस्या इत्यर्शआद्यच् ४६ भवेति भवउत्पत्तिरस्या
स्तिभवी तादृशाप्राकारो यस्याः प्रकारो विश्ववी यस्याः इति हेतुपदमप्या बहुव्रीहिः प्रकारो वा म
देवस्यादाकारस्तत्पिनामह इति नानार्थकोशः तदुभयजनिकेत्यर्थः ४७ सुरसेने
ति स्कन्दभार्यादेवसेनातद्रूपत्वात् षण्मुखे दिव्यपुरवंसी देवसेना हरप्रियेति लिंगपुरा
णोक्तेः अथवा दैत्यमारणे न सेनाकार्यकारित्वात् अथवा सुरूपः प्रीतिस्तुकन्दवी भर्ता
यस्याः इत्यर्थः ४८ सुरेश्वरीति अकारार्थं सुराणां देवानां नराणां तामसानां दैश्वरीत
न्नियामकत्वादिति विचारः यावकेचतीन्द्रेण चेति विश्वः ४९ श्रीमतीति नित्ययोगादौम
तुप् ५० शिशिरेति सुषीमः शिशिरो जड इत्युपक्रमस्य समानलिंगका इत्यमरः सौम्यरू
पत्वात् ५१ अनन्तेति येनाप्रतियोगित्वात् अथवा भावप्राधान्यादनेनतन्त्रमस्यस्याः अनन्ती ४२

52

© Dharmartha Trust J&K. Digitized by eGangotri

भोमिनामसीतिहरिवंशात् ५२ शिशिराचलकन्यकेति सतीदेहत्यागानंतरंतदुत्पन्न-
त्वात् शिशिरः स्याद्धिमोर्भेदेतुषारेशीतलेन्यवदितिविश्वः ५३ सुरमान्येतिस्पष्टम् ५४
सुरश्रेष्ठेतिसुरेषुश्रेष्ठाप्रशस्यतरा प्रशस्यस्यश्रादेशः ५५ ज्येष्ठेति शक्तिविशेषरूपत्वात् सर्वो
त्तमत्वाद्वा यद्वा कन्यास्यैकैष्टमीशुक्लाज्येष्ठर्क्षे महतीस्मृता अलक्ष्मीपरिहारायज्येष्ठांत
त्रप्रपूजयेदितिलिंगपुराणोक्तव्रतदेवतेयं ५६ प्राणेश्वरीति पुंसिभूम्न्यसवः प्राणा इत्य
मरः आत्मस्वरूपत्वात् तथाचश्रुतिः नप्राणेनतापानेनमर्त्यो जीवतिकश्चन इतरेणतु
जीवंतियस्मिन्नेतावुपाश्रितौ अथवाप्रसिद्धस्यप्राणस्यईश्वरीनद्यापाटहेतुत्वात् प्राणस्य
प्राणमुतचक्षुषश्चक्षुरितिश्रुतेः ५७ स्थिरेति ब्रह्मरूपतयापारमार्थिकत्वात् ५८ त
मोघ्नीतितमोमोहात्मकंहंतिस्वज्ञानानतया ५९ ध्वांतसंहंत्रीति ध्वांतमज्ञानंसम्यक्हंतिप्रा
ध्वदर्थः मोक्षहेतुत्वात्तमसभयत्रासपर्यायः ६० प्रयतात्मेति प्रयतः पापारहितः ब्रह्मायस्ये
तिकर्मधारयः यद्वात्माऽपहतपाप्मेति अस्नाविरंशुद्धमपापविद्धमितिश्रुतेः ६१
पतिव्रतेति नास्तिस्त्रीणांपृथक्यज्ञोनव्रतेनाप्युपासनेतिस्मृतिः तथोक्तं आर्तार्ते मु

© Dharmartha Trust J&K. Digitized by eGangotri

दिनेहृष्टाप्रोषितेमलिनाकृशा मृतेम्रियेतयापत्यौसास्त्रीज्ञेयापतिव्रतेति ८२ प्रद्योतिनी
ति प्रकर्षेणद्योततेद्योतयतिवाजगत् सात्वमतेआविमविमस्यपदार्थत्वात् तमेवभांत
मनुभातिसर्वंतस्यभासासर्वमिदंविभातीतिश्रुतेर्वा ८३ रथाङ्गेति रथःस्यात्स्यंदने
कायइतिविश्वः आत्मरूपेणदेहाधिष्ठातृत्वात् द्वासुपर्णासयुजासखायोसमानंवृक्षं
परिषस्वजाते तयोरन्यःपिप्पलंस्वाद्वत्यनश्नन्नन्योअभिचाकशीतीतिश्रुतेः आत्मानं
रथिनंविद्धिशरीरंरथमेवतुइतिश्रुतेश्च यद्वा ततोपराह्नसमयेनवम्यांवैरथेस्थिता
भवानीभ्रामयेद्राष्ट्रं स्वयंराजाविशावृत्वान् इतिप्रसिद्धोर्थः ८४ सर्वलोकप्रकाशिनीति
तस्यभासासर्वमिदंविभातीत्युक्तेः अथवा लोक्यंतेभुज्यंतेविषयाएभिरितिलोका इं
द्रियाणितत्प्रकाशिका आत्मरूपत्वात् यमन्तस्थस्यवाश्रित्यबोधस्वरूपंमनश्चत्वगादीन्यबो
धात्मकानि प्रवर्तंतआश्रित्यनिर्द्वंद्वंयमेकंसनित्योपलब्धिःस्वरूपोहमात्मेत्युक्तेः इंद्रिया
णांकरणत्वेनकुठारादिवत्कर्तृव्यापार्यपेक्षत्वनियमेनात्मसिद्धिस्वीकाराच्च ८५ मेधाविनीति
अस्त्यायामेधेतिमत्वर्थेविनिः यद्वाभक्तानांमेधांअवतिमेधाविनी ८६ महावीर्येति ना

ना॰ स॰
टी॰
४२

53

© Dharmartha Trust J&K. Digitized by eGangotri

नाविधसंसारजनकत्वात् सर्वैश्वरत्वाद्व तथा चश्रुतिः सकारणं करणाधिपाधियो न चास्य
कश्चिज्जनिता न चाधिपइति ८९ हंसीति हंसो विहगभेदे स्यादर्के विलोहयोन्तरे योगिमात्रादि
भेदेषु परमात्मनि मत्सरे इति विश्वः वीरचूडामणौ हंसाख्याः सायनेवक्षेमेत्रिगुणेहितकाम्यया
यस्य विज्ञानमात्रेण सर्वज्ञो भवि जायते हंसात्मिका भगवती जीवो जयति सर्वदा हंसाख्यस्य
द्राविशेषरूपत्वाद्वा होमेमुद्रात्रये प्रोक्ते मृगीहंसीवस्त्रकरीति यामले लोके: ८८ संसारतारिणी
ति संसारः खंडः खेयमेगो हि संसार इति कीर्तित इति पार्थसारथि मिश्राः जीवन्मुक्तो भवतीत्या
यर्वणात् ८९ प्रणतप्राणिनामार्तिहारिणीति भक्तिश्रद्धातिशयलक्षणः प्रकर्षः प्रशब्द
द्योत्यः आर्तिः पीडां हरतीति तच्छीला ७० दैत्यनाशिनीति व्यक्तार्थं यद्वादितेः छिन्नः तस्य भावो
दैन्यं भावे ष्यञ् तन्नाशयति अखंडरूपत्वात् कपालकत्वाद्वा ७१ डाकिनीति मूर्तिमन्नाम्नि
काद्वेवी तया डाकिनि तारिणीति कवचप्रस्तावे गंधर्वतंत्रोक्तेः उक्तं चक्रकालचूडामणौ डाकि
नी वामपार्श्वेंतु कोटिसूर्यानलोपमामिति छिन्नमस्ताख्याचाद्वा अथवा सुराभेदरूपत्वा
त् तथा च मुंडमालायां सुरा तु त्रिविधा देवि स्फाटिकी डाकिनी तथेति प्रक्रम्य डाकिनीप्रा

© Dharmartha Trust J&K. Digitized by eGangotri

त·र·
टी·
४४

नमात्रेणसर्ववश्योभवेद्ध्रुवः ७२ शाकिनीति ज्ञानार्णवे डाकिनीशाकिनीचैवह्याकिनीकाकि
नीततः शाकिनीहाकिनीचैवपाश्चिमादिक्रमायजेत् इतिचैतन्यकल्पेउक्तं अत्रापिद्वात्रिंश
द्वर्णमंत्रविशेषे कुलिकाकामिनीज्ञानाडाकिनीराकिनीतथा लाकिनीकाकिनीपश्चा
च्छाकिनीहाकिनीतथेत्युक्तेः तथावर्योगरत्नावल्यां खेचरीभूचरीभेदाच्छाकिन्योहिद्वि·
यामताः तासांस्थानानिरूपाणिकथयामियथागमे उद्यानेदिव्यदेशेषुपर्वतेषुमहाम
लाः क्रीडंतिदेवतादिव्याः भूचर्यःपुरभूमिषु नानारूपधराद्दृप्ताः खेचर्योवरसिद्धिदाः
कथंचिदुद्वशापेनमर्त्यलोकेवसंतिताः नानाश्चर्यगुणोपेताहृष्टास्तेनशुभेविना क्षेत्रपीठे
तथाग्रामेनगरेविषयेपुरे वसंत्यनेकरूपेण शाकिन्योऽ शाकिनाः सदा चंद्रमंडलसं
काशेदेविशाकिनिनाविणीनिशेषर्वतेतत ७३ शीलेति वांछावारंत्यहृष्टादिकरणान्
शील्यतेसर्वैः सेव्यतइतिवा ७४ वराभयहस्तागमयाविरीति वरप्राहेनततन्मुद्रायाउपादा
ने ज्ञानार्णवे वरदाभयमुद्रेत्वपरदाभयवात्रियेइति खड्गागमाद्युधविशेषः अत्रवरधार
णेबालात्रिपुरायां विष्टतजपवटीपुस्तकाभीतमभीष्टामिति प्रपंचसारात् अथकामेश्वर्या॥ ७७

© Dharmartha Trust J&K. Digitized by eGangotri

रत्नपात्रं सुधापूर्णं वरदे बिभ्रती करैरिति कादिमतात् अथवा संपत्प्रदभैरव्यां वरदा
नपरो नित्यं महासंपत्प्रदो स्मरेदिति ज्ञानार्णवात् एवमन्यत्रापि बोध्यं खट्वांगधारणे
दक्षिणकाल्यारेये शूले खट्वांगं दक्षिणे इति वीरचूडामणिस्मरणात् विचित्रखट्वांग-
धरा नरमालाविभूषणेति मार्कण्डेयपुराणे यद्वा पंकजे पुष्पमालां च वराभीती सृजे बुवेति
दृष्टिध्याने खट्वांगमुशलं दोर्भिरिति च संहारध्याने एतद्भेदं शुत्तत्रान्तरोक्तेः ७५ कौ
मुदीति यदादित्यगतं तेजो जगद्भासयतेऽखिलं यच्चंद्रमसि यच्चाग्नौ तत्तेजो विद्धि मामक
मित्युक्तेः चंद्रिका कौमुदी ज्योत्स्नेत्यमरः तद्वत्सौम्यत्वाद्वा ७६ कुमुदेति मोदंते प्रीयंते
स्वल्पविषयप्रायेति मुद्राः उग्रपक्षात् कप्रत्ययः काम्यकार्यपरा इति यावत् कुत्सितास्ति
यस्या तदुक्तं वीरचूडामणौ प्रयोगो नैव कर्त्तव्यो यदीच्छेद्दीक्षितं फलं प्रयोगादल्पसिद्धि
स्स्यादित्येवं शंकरोऽब्रवीत् ७७ कुंदेति तत्पुष्पप्रियत्वात् माघ्ये कुंदेत्यमरः बिल्व
पत्रैः कुंदपुष्पैर्नागपुष्पैः सुशोभने इति नादिणितंत्रात् ७८ कौलिकीति कुलाचा
रप्रियत्वात् अनुइनिठनाविति ठन्प्रत्ययौ तात्स्वार्थेऽण् अथवा कुलिकाख्यो नाग

© Dharmartha Trust J&K. Digitized by eGangotri

ता॰ र॰
टी॰
४५

तस्येयं कैरवसंवेद्यमित्यर्थः तथा भजेष्विनागः कुलिको ऽगदो मत्तदन्तपनिषद्वाक्यात् ७९
कुलजेति लज्जमन्त्रेन यन्त्रर्थैक ऽभक्तेन मित्यर्थः कुत्सितो न ष्ठीलजो वीरनिंदायस्या
इत्यर्थः तथाच कुलार्णवे कुलदर्शनशास्त्राणि कुलद्रव्याणि कौलिकान् उत्सुपक्रम्य
नर्निद्रैत्त्वचगुरुतेन नहसेन्नावमानयेत् ८० अमलेति अविद्यमानो मलो ज्ञानेयस्याः
विमलत्वेन वमत्यर्थः विषयतासंवेद्याव बहिः प्रवेशि ताक ज्ञानो भवतीति यावत् कलि
मल्योः कामयेत् न नवहर्षमात् दुर्गेयत्यर्थः ८१ गर्वेति गर्वो ऽहंकारस्तेजातो यस्याः स
र्वोत्कृष्टत्वात् अथवा गर्वे गमयत्येषु कल्पद्रुमादिपदितः तदर्थानां ज्ञानार्थतां गङ्गैश्व
र्येनेत्यर्थः ८२ गुणसंपन्नेति सत्वादिगुणत्रयाश्रयभूता प्रकृतिरूपत्वात् अथवा गुणाः
रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेह
शब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराइतिसप्तदशसूत्रोक्ताः सप्तचकारोपा
त्ताइति चतुर्विंशतिर्वैशेषिकप्रसिद्धाः तत्संपन्नात्तद्गुणरूपेणानेषां तत्समवेततादि
तिभावः ८३ नगजेति पैवमर्गाजनेर्ड प्रत्ययः न विद्यते गजो हस्तीव लिङ्गेन यस्याइतिवा ४५

45

© Dharmartha Trust J&K. Digitized by eGangotri

नकदाचित्पादैर्बैप्रदयाहृयहास्मिनौइति कालिकापुराणात् ८४ खगवाहिनीति
सरस्वतीरूपत्वात् हंसारूढा हरहसितहारेंदुकुंदावदातेति प्रपंचसारात् खगंवाहयंती
गमयंतीति व्युत्पत्त्यावायमर्थः प्रार्थः प्राप्तः खगाश्चाकाशगामिनी चासौवाहिनी नदी चेति
वा समासः ८५ वेदाननेति वेदतुल्यं माननं यस्याः ८६ महोग्रेति विनापि समासं पूर्वोत्त
रपदयोर्लोपः यथा भामासत्यभामेति महाभाष्योक्तेरेकदेशप्रस्थापितदर्शनं वा एतेभेदाः
महोग्रायाः पुरुषार्थप्रवर्तकाः तत्पादावपि तथाव्यवहारात् महानुग्रो यस्याः इति पंच
मीबहुव्रीहिर्वा शिवः शक्त्यायुक्तो यदि भवति शक्तः प्रभवितुमित्युक्तेः ८७ चारुमूर्द्धजशो
भितेति सामुद्रिकोक्तलक्षणविशिष्टकेशत्वात् यद्वा चरुभ्यो मूर्द्धभ्यः शिरोभ्यो जातेन मा
ल्यरूपमाभरणेन शोभितत्वात् ८८ मनोज्ञेति सर्वेषां मनो जानाति सर्वांतर्यामित्वात् य
द्वा मनोपि ज्ञं यस्याः इति बहुव्रीहिः येमनो न वेद यो मनोंतरो यमयति स त आत्मांतर्या
म्यमृत इति श्रुतेः ८९ माधवीति सुराप्रियत्वात् कुलपूजोक्तकुट्टनीरूपत्वाद्वा श्रुतिसूक्त
कपुष्पाणां पूजायां विधानाद्वा वासंतीहितयेवैवेति मत्स्यसूक्तात् माधवीमदिरायां वकु

© Dharmartha Trust J&K. Digitized by eGangotri

ल॰ स॰
टी॰
४८

हत्यामृतिमुक्तकेऽर्थस्तिविषयाः ९० मान्येति मालक्ष्मीरेवान्यासादृशप्रयोगियात्यस्या
उत्पन्नवैवेकेदःफलं ९१ माननीयेति योग्यत्वेऽग्रनीयश्चसर्वैश्चरत्नादित्यर्थः यद्वामा
न्नानेनतेनआनतीयाजीवनहेतुः वाङ्लकात्फर्नेयनीयत्व परमात्मस्वरूपत्वात् नद्धा
नादेवसंसारतिहतेः ९२ महद्गुणेति क्रोदसंभावः यद्वामहत् ततभेदोगुणोगंयस्याः
तस्यप्रकृतिभवत्वात् प्रकृतेर्महांस्ततोऽहंकारइतिसांख्यवचनात् ९३ श्रेष्ठेतियोऽह
वैज्येष्ठंचवेदेतिश्रुतौप्राणस्यश्रेष्ठत्वेनोक्तेः सद्रूपत्वात् यद्वाविशेषानपेक्ष्यश्रेष्ठता
भिधानेनसर्वापेक्षश्रेष्ठत्वलाभेनपरमात्मरूपत्वात् ९४ ज्येष्ठेति नक्षत्रविशेषरू
पत्वात्वा॰ ९५ मघेति पूर्ववदर्थः यद्वामघयतिसुखयति तथाच मघशब्दान्मघवापि
मयवक्ष्यहोयाख्यातः कयट्टो ९६ पुष्येति पुष्यसिद्धौनक्षत्रेनिपातः सर्वाणिन
क्षत्राणिस्त्रीलिंगान्यपिकविदृश्यन्ते यद्वा भक्तान् पुष्णातिपुष्या क्रोदसत्वात्कर्तरि
ण्यत् यद्वा पुष्यपानोभावेक्विप् ९७ धनिष्ठेति अविषनिष्ठामिष्टत्व स्वाक्षविष्ठा
धनिष्ठेतिहलायुधः अथवायस्यपुष्टेर्निष्ठाधर्यवसानं पाजेऽसजर्थकः नित्यपूर्णा ४५

46

© Dharmartha Trust J&K. Digitized by eGangotri

तादितिभावः ९८ पूर्वफल्गुनीति पूर्वा चासौ फल्गुनी च तस्या हि विधत्वात् अथवा फल
तीति फल फलते क्विप् तादृशी गौर्वाणी यस्य सः फल्गुः तेन पतीति फल्गुनी नयते क्विप्
नैवैवं विसर्गश्रवणाय पतिः आकारोऽत्र ह्रस्वान्तस्येयं ई तसेदमित्यण् यस्येति त्याकारलोपः
टिड्ढाणञिति ङीप् फल्गुनी चासौ ई चेति व्याख्यानात् तत्र हल्ङ्याब्भ्य इति हलोपस्य हल
भत्वात् सवर्णनीसरूपेति यावत् पूर्वा मुख्या चासौ फल्गुनीति समासः सिद्धमेवोपदा
मैत्रीत्यादिवचनात् अत्र नक्षत्रांशे पूर्वफल्गुन्यां यत्निष्ठा यो च भगवत्याः जन्मैव हेतुः
अन्यत्र कौलतंत्रे चेति विशेषो ध्येयः ९९ रक्तबीजारिहेत्रीति रक्तमेव बीजं सजातीयान्यो
त्पत्तिकारणं यस्य स रक्तबीजः रक्तविंदुर्यदा भूमौ पतत्यस्य शरीरतः समुत्पतति मेदिन्यां
तत्प्रमाणस्तदासुर इति मार्कंडेयपुराणात् स एव अरिरिति समासः १०० वाक्प्रमाणपद
सागरपारगस्य लक्ष्मीधराभिधबुधस्य तनूद्भवेन विश्वेश्वरेण विहिते गिरिजाभिधार्थ
चिंतामणौ व्रजति पंचमकोमयूखः ५ आपिंगलाकृतिजटातडितावभाती मूर्द्धे स्फुर
न्नरकपालल सद्वलाका कादंबिनीव नवनीरदनीलदेहा जेत्री पतां भवनपंजरमध्य

© Dharmartha Trust J&K. Digitized by eGangotri

तं॰ रा॰
टी॰
४८

तारा अथ पंचमशतव्याख्यानं रक्तबीजविनाशिनीति पूर्वेण व्याख्यातं यद्वा रक्तस्य देव-
तासमर्पणीयस्य बीजे कारणभूतो यो विः पदीतेनाशयति बलित्वेनेत्यर्थः पादीपणः क-
व्यमाशाह्या इति कालिकापुराणात् १ चंडमुंडविहंत्रीति चंडो दैत्यांतरे तीव्रे इति मुंडो
दैत्यांतरे हाराविति च विश्वः तयोश्च विशेषणेन कर्मधारयः यदा तायोरती चक्राणि अराः सं-
त्येषामिति विद्युत्सन्नैः तदुक्तं मार्कंडेयपुराणे तत्स्तवे तानि चक्राण्यनेकानि विशा-
मानानि तन्मुखं वभूर्यथार्कबिंबानि सुबहूनि घनोदरं प्रावदन्यत् २ चंडमुंडविना-
शिनीति व्यक्तं यद्वा चंडेती वहृपंचपन्नमुंडस्य शिरः तद्विनाशयति छिन्नमस्तारूपत्वात् ३ र-
क्तश्रीति आर्द्रदन्तमतादीप्तः ४ हवीति लोकसंहारकत्वात् ब्रह्मविष्णुमहरुद्रस्वरूपाणीता:
सदाशिवेति सगुणपरमेश्वरीसृष्टिस्थितिलयात्मिकेति ज्ञानार्णवात् परमात्मा-
रूपत्वात् तथा च श्रुतिः यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः मृत्युर्यस्योपसेचनं क इत्था
वेद यत्र सः ५ रक्तश्रीति शोभनाकर्त्री श्राप्युषेतत्र नानारूपत्वोक्तेः यद्वा शोभनावासो-
कर्त्रीयेत्यर्थः कर्तृत्वेकार्येकपादानगोचरकृतिमत्वं शोभनत्वं च जन्यमात्रोपादानगो-

४८

© Dharmartha Trust J&K. Digitized by eGangotri

चरकृतिमतस्वरूपं ग्राह्यं कृतिपदार्थैकदेशेकार्ये साकल्यपरत्वग्राहकः स्वशब्द इतिया
वत् ६ विमलेति विशेषेणमेशिवेलातिगृह्णातिस्ववशीकरोतीतियावत् मनोहरत्वा
त्प्रकृतिरूपत्वाद्वा ७ अमलवाहिनीति अमलश्चासौवाहश्चसोस्याअस्तीतिअथवाह
ष्टत्वात् कर्मधारयादपिबंधादसौमत्वर्थीयः अथवा अमलचासौवाहिनीचेतिसमा
सः तथाचपरमेश्वरीध्यानेप्रपंचसारे अश्वारूढाकराग्रेनवकनकमयीवेत्रयष्टिंद
धानेति ८ निर्मलेति निर्गतामालक्ष्मीर्ज्ञानेनवायस्मात्तेनिर्म यद्वामात्तोनिःक्रांता
मिति निरादयः क्रांताद्यर्थेपंचम्येतिसमासः दरिद्रंसंसारिणंवालास्वीकरोति संपत्ति
मत्त्वान्नोभयहेतुत्वादनुगृह्णातीतियावत् ९ भास्करीति यदादित्यगतंतेजइतिवच
नात् नाडीविशेषरूपत्वाद्वा इडामोसोस्थितश्चंद्रः पिंगलाभानुवाहिनीतिस्वरशा
स्त्रात् सूर्यप्रकाशजनकत्वाद्वा येनसूर्यस्तपतितेजसेचइतिश्रुतेः १० भीमेति यो
गिनीविशेषरूपत्वात् यद्वा बिभ्यत्यस्मादितिभीमा भयादस्याग्निस्तपतीत्यादिश्रुतेः भी
मादयोपादानेइतिसाधुः यद्वा भियंसंसारादिजन्यांभीतिंमातिपरिच्छिनत्तिनाशयती

© Dharmartha Trust J&K. Digitized by eGangotri

न॰र॰
टी॰
४८

त्रियावत् श्रियं भक्तानिष्टां भीति मातिजानाति वा तदुपकारकत्वात् यद्वा भा ज्ञाने भाया
इयं भीतिस्तदा भित्याप् यस्येति चेत्यकारलोपः टिड्ढाणञ् इति ङीप् ज्ञानजनकेति या
वत् तादृशी माता ज्ञानं यस्याः भक्तानिष्टज्ञानविशेषजनकं यद्भक्तिरूपं ज्ञानं तद्विष
यस्तदर्थः ज्ञाने विशेषलक्षणा स्वविषयतेन तद्विषयं वग्राह्यं ॥ महिषासुरघातिनी
ति घातयतीति स्वार्थे णिजन्तात् हन्तेर्णिनिः ९ कालिंदीति यमुनायाः कलिंदपर्व
तसंबंधात्कालिंदी संज्ञेति पद्मपुराणे यद्वा कोब्रह्मादिः तद्युक्तमलिंदमिति मध्यम
पदलोपी समासः गृहद्वारमलिंदः स्यादित्यमरः तस्येयं कालिंदीति स्वस्वामिभाव
संबंधः सेवार्थं ब्रह्मादीनां गृहद्वारे वर्तमानत्वादिति परमैश्वर्यसूचनं १० यमुनेति य
मेन यमजेति स्वामी कालिंदी सूर्यतनया यमुना शमनस्वसेत्यमरः यद्वा यमयति स
मस्तमंतर्यामित्वादिति यमुना यमयतेर्बाहुलकादुनप्रत्ययः यद्वायतिजानातियः
गत्यर्थं ज्ञानार्था इति न्यायात् इण्गतौ अस्मात्स्वार्थे णिच् दणो यणिति यणादेशः मु
निमिव करोति मुनयतीति णिजन्तात्स्वार्थे णिच् णेरनिटीति णिलोपः यस्य मुना यमुने

48

४८

© Dharmartha Trust J&K. Digitized by eGangotri

तिसमासः स्वज्ञानवतोमुनिसादृश्यकत्रीतिफलितार्थः ससन्यासीसयोगीचसम्य
क्तःसचब्रह्मविदितिवचनात् ४८ हृद्येति प्रवयास्थविरोवृद्ध इत्यमरः वृद्धेनेसम्भ
नेक्तइतिस्वामी जन्ममात्रापेक्षयाश्वकालदृष्टितितात्पर्यं ४९ भुवनीति इतस्त्रिरि
तिनिप्रत्ययः ततोङीष्पीतिःसत्प्रत्ययांताद्वा यद्वा भुमिश्रणामिश्रणयोरितिपा
ठादमिश्रणमत्रभुषात्वर्थः अविद्यकेप्रपंचसंबंधेसत्यपि ब्रह्मणस्तदोषप्रसक्तिर्नो
स्ति प्रकाशनादिवन्नैवंपरइतिन्यायात् सूर्यादिप्रकाशोयथाजालावच्छेदेनवक्र
त्ववक्रत्वादिमान् यथावा आकाशंकर्णावच्छेदेनवशब्दग्राहकं तद्वदतः करणाव
च्छेदेनैवईशस्यसंसारित्वमितितदर्थः ५० वालिकेति स्वार्थेकः तथावक्ष्यति नेस्त्री
नेपुमान्नस्तिकुमारउतवाकुमारी तेजीर्णोदंडेनवंचसितजातोभवसिविश्वतोमु
खः अनेनवयस्त्रितयेपियोषितांदेवतारूपत्वमुक्तं स्त्रीत्वमात्रस्यपूज्यतावच्छेदक
तावगमात् वालोवायौवनो [illegible] मोहृद्धोवासुंदरींतथा क्रान्तिंतांवामहाधुष्टेनमनसा
विभावयेदिति कालीतंत्रोक्तेः वालासात्षोडशाद्वेतिकामप्रणासेत्त्राकावा इतीपृच्छावि

© Dharmartha Trust J&K. Digitized by eGangotri

ना॰ टी॰
४९

49

पानात् षोडशाब्देन युवतीं पीनोन्नतपयोधरामिति वीरचूडामणिवचनात् त्रिपुरा
त्रिविद्यादेविवालात् प्रथमोसूत्रेण इति ज्ञानार्णवात् ८७ कौशल्येति वृद्धेत्कोश
लादादित्यप्रत्ययः सर्वैर्ब्रह्मादयोऽप्ययं मदेशाभावसंभवाः इति कुलचूडामणि
वचनात् तस्याः रामजननीत्वात् अदितिरूपत्वात् स्याश्च सत्यं शतत्वात् त्वं हि यज्जाया
पतिकश्यपो ब्रह्मणः सूनुः कौशल्या चादितिः सर्वदेवमाता सर्वयशस्विनीत्यथ्या
ए जगन्निर्माणशक्तिमत्त्वात् यद्वा कुशलस्य भावः कौशल्यं ब्राह्मणादिभ्या
त्ष्यञ् तदस्त्यस्याः यद्वा कुशलैव कौशल्या स्वार्थे ष्यञ् ८९ कौमुदी कौमुदी कार्त्ति
कोत्सवहेतुत्वात् तथा चोक्तं जितस्त्वशंकरस्त्वत्रजपंलेभेवपार्वतीति ९० माद्रीति
अतिभवति सूत्रेण स्त्रियां तद्राजाकारलोपविधानान्माद्री सुतावित्यादौ मद्रीत्येव या
ठ इति पदमंजर्यां भर्गादित्वे कल्पयित्वा न प्राच्यभर्गादिति निषेध इति दीक्षिताः दी
र्घपाठे आवमते मित्रार्थ्यार्णतत्वाकार्यं यद्वा मदं सुखं तस्यै येजनकत्वसंबंधेनेति
माद्रीसुखजनकेतियावत् ९१ हयतीति भक्तानंदः स्वरोधिकेतियावत् लक्षणे ७२

© Dharmartha Trust J&K. Digitized by eGangotri

शतृप्रत्ययः शयानाभुंजत इत्यादिवत् २१ अरुंधतीति महाभारते दानधर्मे कत्तोप्र
त्तिनडुक्तिः धरान्यरित्रीवसुर्यां भर्तुस्तिष्ठाम्यनंतरं मनोनुरुंधती भर्तुरिति मां वि
द्ध्यरुंधतीं अरुंधती सती नानाविति कौमर्मे अरुंधती सती तां तमिति मात्स्ये अरुंध
त्येकभर्तृणामिति हरिवंशे उर्जामाद्रुह मोहद्भाः वशिष्ठं च महेश्वरमिति लिंग
पुराणे पर्यायनेयथाक्रमत्सेवप्रकृतेसंगानिर्भेदेन लक्षणयेत्तिबोध्यं २२ पुरारि
ष्टहिणीति पुरारिरुद्रः त्रिपुरहंतृत्वात् २३ पूर्णेति स्वोत्कृष्टकवंतराभावात्
आप्तकामत्वान्निकृतेः स्वनिष्ठस्वखंडः स्वाभावगोचरेष्वावजित्रतेश्पूर्णांता अप्रतिह
तेच्छत्वेना अथवा दशम्याः पूर्णसंज्ञत्वात्तस्या अकौलिकत्वाडुपादाने २४ पूर्णात्
पेति सर्वदैकरूपत्वादित्यर्थः २५ पयस्विनीति पयः स्यात्क्षीरनीरयोरितिवि
श्वः अस्मायेतिविति तथावतर्पणप्रकाम्यसिद्धसारस्वते कालागरुद्रवोपेतै
विविधैर्गंधवारिभिरिति २६ संपूर्णेवंद्रवदनेति धर्मवाचकलुप्तोपमासमासे य
द्वा चंद्रस्य दर्शवदने चेद्रूपेववर्णेपमाः विधिनिषेधोपदेशेन सर्वाननुग्राहकत्वा

© Dharmartha Trust J&K. Digitized by eGangotri

ना॰ टी॰ प॰

त् तथा च श्रुतिः एवं वा अरेऽस्य महतो भूतस्य निःश्वसितमेतदृग्वेदो यजुर्वेदः साम
वेदोऽथर्वाङ्गिरस इत्यादि यद्वा भक्तानां सत्कावप्रवर्तकत्वात् अत्रपवम्पर्थे वङ्ः
श्रीहिः यद्वा संपूर्णं पालितं वेदस्य वदनैश्वर्यं यया वदगतिश्चैर्ययोः एतस्य वाद
रस्य प्रवेशणसनेगागिसृर्ग्यावेदमसौ विष्टनोतिहृतत्रश्रुतिश्रुतेः २७ वालवेदसमप्रभे
ति रक्तवर्णत्वात् अथवा वेदकलावन्निर्दोषाप्रभामानरूपप्रकर्षवती भाज्ञानेयस्या
सर्वविषयकप्रमाश्रयत्वात् इत्यर्थः २८ रेवतीति नक्षत्ररूपत्वाद्धलभार्यात्वाद्वाग्रही
विशेषरूपत्वाद्वा तथा चारण्यकपर्वणि स्कंदोत्पत्तौ अदितिं रेवतीमाहुर्ग्रहस्तस्या
स्तु रैवतः सोपि वालान्महाघोरो बाधते वै महाग्रहः रेवती हलपत्न्यां स्यात्ताराभेदेग्र
पिमातृषि इति विश्वः २९ रमणीति रमयतीति सर्वसिद्धिदातृत्वात् आनंदब्रह्मणा
विद्वान्न बिभेति कुतश्चनेति श्रुतेर्वा ३० चित्रेति चित्राप्रकृत्यपन्नरत्नाप्सरोहिभे
देषु कर्बुरे वाभिधेयवदिति विश्वः यद्वा प्रकृतिरूपत्वात् अजामेकां लोहितशु
क्लकृष्णां वह्वीः प्रजाः सृजमानां सरूपामिति श्रुतेः यद्यपि रजः प्रभृतिशुक्लादि

© Dharmartha Trust J&K. Digitized by eGangotri

